यथा स्वेनैव यथा भ्रूणहैवं भवतीति योऽयोनौ रेतः सिंचति तयोनौ अदारेषु पुंसां गमनात्समवायस्क्रातिसिद्धिः तथा येन्तरीषां निष्कृतिं जारिणीवेति मंत्रे जारिण्या निष्कृते
पीडा स्वदर्शनात्स्त्रीणामपि परं संगे दोषो लेशो वोक्तः तथापि स्त्रीनार्य्ये सैवकया विमृश्या अवस्थेयं विहितेति ज्ञेयं। अथवा व्युच्चरणे तेजस्विनां न दोषः किं तु पृथग्जनानां

ऋषिपुत्रोऽथ तं धर्मं श्वेतकेतुर्न चक्षमे चकार चैव मर्यादामिमां स्त्रीपुंसयोर्भुवि १५ मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु तदाप्रभृति मर्यादा स्थितेयमिति नः श्रुतं व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकं भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहं १७ भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीं पतिव्रतामेतदेव भविता पातकं भुवि १८ पत्या नियुक्ता या चैव पत्नी पुत्रार्थमेव च न करिष्यति तस्याश्च भविष्यत्येतदेव हि १९ इति तेन पुरा भीरु मर्यादा स्थापिता बलात् उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना २० सौदासेन च रम्भोरु नियुक्ता पुत्रजन्मनि मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतं २१ तस्माल्लेभे च सा पुत्रमश्मकं नाम भाविनी भार्या कल्माषपादस्य भर्तुः प्रियचिकीर्षया २२ अस्माकमपि ते जन्म विदितं कमलेक्षणे कृष्णद्वैपायनाद्भीरु कुरूणां वंशवृद्धये २३ अत एतानि सर्वाणि कारणानि समीक्ष्य वै ममैतद्वचनं धर्म्यं कर्तुमर्हस्यनिन्दिते २४ ॥ ७ ॥ ॥

मेवेति तात्पर्यं अन्यथा व्युच्चरणस्यापि पारदार्यदोषप्रसक्तेः अहिल्यादिजारिणीनामिंद्रादीनां च दम्प्रसक्तेश्चेत्यास्तां तावत् १५ १६ १७ १८ प्रकृतोपयुक्तमाह पत्येति अयुक्त-
मपि भर्त्राज्ञया स्त्रीभिरवश्यं कर्तव्यमिति भावः १९ २४ ॥

२५ पुराणंमुगांतरीयं २६ १८ रक्तांगुलितलेनाग्रांमानीतिरिक्तांगुलितलिमः पद्मपत्रनिभाउपमायस्मसतथा २९ ३२ अभिचारोदेवताकर्षणशक्तिलघुक्तं

आत्तावृत्तोराजपुत्रीस्त्रियाभर्त्तापतिव्रते नातिवर्त्तव्यइत्येवंधर्मंधर्मविदोविदुः २५ शेषेष्वन्येषुकालेषुस्वातंत्र्यंस्त्रीकिलार्हति
धर्ममेतंजनाःसंतःपुराणंपरिचक्षते २६ भर्त्ताभार्यांराजपुत्रिधर्म्यंवाधर्ममेववा यद्ब्रूयात्तत्तथाकार्यमितिवेदविदोविदुः २७
विशेषतःपुत्रगृद्धीहीनःप्रजननात्स्वयं यथाहमनवद्यांगिपुत्रदर्शनलालसः २८ तथारक्तांगुलितलःपद्मपत्रनिभः
शुभे प्रसादार्थंमयातेयंशिरस्यभ्युद्यतोंजलिः २९ मन्नियोगात्सुकेशांतेद्विजातेस्तपसाधिकात् पुत्रान्गुणसमायुक्ता
नुत्पादयितुमर्हसि त्वत्कृतेहंपृथुश्रोणिगच्छेयंपुत्रिणांगतिं ३० वैशंपायनउ च एवमुक्तातत कुंतीपांडुंपरपुरंजयं प्र
त्युवाचवरारोहाभर्त्तुःप्रियहितेरता ३१ पितृवेश्मन्यहंबालानियुक्तातिथिपूजने उग्रंपर्यचरंतत्रब्राह्मणंसंशितव्रतं नि
गूढनिश्चयंधर्मेयंतंदुर्वाससंविदुः ३२ तमहंसंशितात्मानंसर्वयत्नैरतोषयं समेभिचारसंयुक्तमाचष्टभगवान्वरं ३३ मंत्रं
त्विमंचमेप्रादादब्रवीच्चैवमामिदं यंयंदेवंत्वमेतेनमंत्रेणावाहयिष्यसि अकामोवासकामोवावशंतेसमुपैष्यति ३४ तस्य
तस्यप्रसादात्तेराज्ञिपुत्रोभविष्यति इत्युक्ताहंतदातेनपितृवेश्मनिभारत ३५ ब्राह्मणस्यवचस्तथ्यंतस्यकालोयमागतः अ
नुज्ञातात्वयादेवमाह्वयेयमहंनृप ३६ तेनमंत्रेणराजर्षेयथास्यान्नौप्रजाहिता ३ ॥

३९ विलंबासहः पांडुरुवाचायैवेति ४० नःक्षत्रियाणांधर्मः पालनंअधर्मेणानसंयुज्जतेनसंभवति। अतःकेवलाधर्मादेवपुत्रएषअइतिभावः यंधर्मइतिमन्यतेलोकःसनोनःधर्मइतिसंबंधः धर्मिकस्वमत्रहेतुमाहधर्मेणेतिधर्मेणास्वविहितेनलौकिकवैदिकाचारेणाधिकं ४१ उपचारआदरअभिचारोव्याख्यानसाभ्यां ४२

आवाहयामिकंदेवंब्रूहिसत्यवतांवर ३७ त्वत्तोनुज्ञांप्रतीक्षामीविद्ध्यस्मिन्कर्मणिस्थितां ३८ पांडुरु च अद्यैवत्वंवरारोहेप्रयत्नस्वयथाविधि धर्ममावाहयशुभेसहिलोकेषुपुण्यभाक् ३९ अधर्मेणचनोधर्मःसंयुज्येतकथंचन लोकश्चायंवरारोहेधर्मोयमितिमन्यते ४० धार्मिकश्चकुरूणांसभविष्यतिनसंशयः धर्मेणचापिदत्तस्यनाधर्मेरंस्यतेमनः ४१ तस्माद्धर्मंपुरस्कृत्यनियताल्वंशुचिस्मिते उपचाराभिचाराभ्यांधर्ममावाहयस्ववै ४२ वैशंपायनउ च सातथोक्तातथेत्युक्त्वातेनभर्त्रावरांगना अभिवाद्याभ्यनुज्ञाताप्रदक्षिणमवर्त्तत ४३ इत्यादिपर्वणिसंभवे २१ वैशंपायनउ च संवत्सरधृतेगर्भेगांधार्याजनमेजय आह्वयामासकुंतीगर्भार्थेधर्ममच्युतं १ सावलिंत्वरितादेवीधर्मायोपजहारह जजापविधिवज्जप्यंदत्तंदुर्वाससापुरा २ आजगामततोदेवोधर्मोमंत्रबलात्ततः विमानेसूर्यसंकाशेकुंतीयत्रजपेस्थिता ३ विहस्यतांततोब्रूयाः कुंतिकिंतेददाम्यहं सातेविहस्यमानापिपुत्रंदेह्यब्रवीदिदं ४

भर्त्रा भर्त्रातथोक्तासतीतथेत्युक्त्वेतियोजनाप्रदक्षिणंआज्ञानुकूलंअवर्त्तनंकृतवती ४२ ४३ अध्यायः १२१ संवत्सर १ जप्यंमंत्रंधर्मदेवताकरूपं २ विमानेस्थित्वा आजगामेत्यन्वयः जपस्थिताजपनिष्ठा ३ ततोविहस्यतांअब्रवीदित्यपकृष्यतेहेकुंतिकिंतेददामितब्रूयाइतिसंबंधः ब्रूयादित्यपपाठोलकारव्यत्ययो वार्षःविहसमानाधर्मेण ४ ॥

५ ऐंद्रेज्येष्ठानक्षत्रेअष्टमेसंवत्सरारंभात्अभिजितेअभिजिन्नाम्नित्रिंशन्मुहूर्त्तस्याह्नोष्टमेमुहूर्त्तेदिवाशुक्लपक्षेमध्यगतेतुलायनगतेइतियोऽशेषेणपूर्णायांपंचम्यांअयंयो
गःप्रायेणाश्विनशुक्लपंचम्यांभवतीतितत्रैवधर्मराजस्यजन्मेत्यर्थः ६-८ प्रथितोग्रहादिनाविख्यातःकीर्तिमान् ९-१५ अंकात्पतनेहेतुमाहकुंतीतिसंभ्रमसंभ्रमेनशिला

संयुक्तासाहिधर्मेणयोगमूर्त्तिधरेणह लेभेपुत्रंवरारोहासर्वप्राणभृतांहितं ५ ऐंद्रेचंद्रसमायुक्तेमुहूर्त्तेभिजितेष्टमे दिवामध्यगतेसूर्ये
तिथौपूर्णेतिपूजिते समृद्धयशसंकुंतीसुषावप्रवरंसुतं ६ जातमात्रेसुतेतस्मिन्वागुवाचाशरीरिणी एषधर्मभृतांश्रेष्ठोभविष्यतिनरोत्त
मः विक्रांतःसत्यवाक्चैवराजापृथ्व्यांभविष्यति ८ युधिष्ठिरइतिख्यातःपांडोःप्रथमजःसुतः भविताप्रथितोराजात्रिषुलोकेषुविश्रुतः
९ यशसातेजसाचैववृत्तेनचसमन्वितः धार्मिकंतंसुतंलब्ध्वापांडुस्तांपुनरब्रवीत् १० प्राहुःक्षत्रंबलज्येष्ठंबलज्येष्ठंसुतंवृणु ततस्तथो
क्ताभर्त्रातुवायुमेवाजुहावसा ११ ततस्तामागतोवायुर्मृगारूढोमहाबलः किंतेकुंतिददाम्यद्यब्रूहियत्तेहृदिस्थितं १२ सासलज्जाविहस्या
हपुत्रंदेहिसुरोत्तम बलवंतंमहाकायंसर्वदर्पप्रभंजनं १३ तस्माज्जज्ञेमहाबाहुर्भीमोभीमपराक्रमः तमप्यतिबलंजातंवागुवाचाशरीरि
णी १४ सर्वेषांबलिनांश्रेष्ठोजातोयमितिभारत इदमत्यद्भुतंचासीज्जातमात्रेवृकोदरे यदंकात्पतितोमातुःशिलांगात्रैर्व्यचूर्णयत् १५
कुंतीव्याघ्रभयोद्विग्नासहसोत्पतिताकिल नान्वबुध्यतसंसुप्तमुत्संगेस्वेवृकोदरं १६ ॥

पिचूर्णीभूतानादृशेष्याघातेसतियस्यनिद्राभंगोपिनजातःनिर्वेदनत्वात्वज्रशरीरत्वादित्यर्थः उत्संगेसमीपे १६ ॥

२२ ४ समाधिना ध्यानेन परमेणानन्यवृत्तिना २५ सूर्येण सह उदयादस्तमयावधिः २६ २७ २८ २९

ततः स वज्रसंघातः कुमारोऽभ्यपतद्गिरौ पपाततेन शतधा शिला गात्रैर्विचूर्णिता १७ तां शिलां चूर्णितां दृष्ट्वा पांडुर्विस्मयमागतः यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम १८ दुर्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप १८ जाते वृकोदरे पांडुरिदं भूयोऽन्वचिंतयत् कथं नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति १९ दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः तत्र दैवं तु विधिना कालयुक्तेन लभ्यते २० इंद्रो हि राजा देवानां प्रधान इति नः श्रुतं अप्रमेयबलोत्साहो वीर्यवानमितद्युतिः २१ तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलं यं दास्यति स मे पुत्रं स वरीयान्भविष्यति २२ अमानुषान्मानुषांश्च संग्रामे स हनिष्यति कर्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः २३ ततः पांडुर्महाराजो मंत्रयित्वा महर्षिभिः दिदेश कुंत्याः कौरव्यो व्रतं सांवत्सरं शुभं २४ आत्मना च महाबाहुरेकपादस्थितोऽभवत् उग्रं स तप आस्थाय परमेण समाधिना २५ आरिराधयिषुर्देवं त्रिदशानां तमीश्वरं सूर्येण सह धर्मात्मा पर्यतप्यत भारत तं तु कालेन महता वासवः प्रत्यपद्यत २६ शक्र उवाच पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतं ब्राह्मणानां गवां चैव सुहृदां चार्थसाधकं २७ दुर्हृदां शोकजननं सर्वबांधवनंदनं सुतं तेऽग्र्यं प्रदास्यामि सर्वामित्रविनाशनं २८ इत्युक्तः कौरवो राजा वासवेन महात्मना उवाच कुंतीं धर्मात्मा देवराजवचः स्मरन् २९

आ०
२२६

३३ ३४ आभाष्यहेकुंतिइतिसंबोध्य ३५ ३७ वहिष्यतिपालयिष्यति ३८ ३९ मेधानश्वमेधान् ४० ४५

उदर्कस्तवकल्याणितुष्टोदेवगणेश्वरः दातुमिच्छतिते पुत्रंयथासंकल्पितंत्वया ३० अतिमानुषकर्माणंयशस्विनमरिंदमं नीतिमं
तंमहात्मानमादित्यसमतेजसं ३१ दुराधर्षंक्रियावंतमतीवाद्भुतदर्शनं पुत्रंजनयसुश्रोणिधामक्षत्रियतेजसां लब्धःप्रसादोदेवेंद्रात्त
माह्वयशुचिस्मिते ३२ वैशं एवमुक्तातत:शक्रमाजुहावयशस्विनी अथाजगामदेवेंद्रोजनयामासचार्जुनं ३३ जातमात्रेकुमा
रेतुवागुवाचाशरीरिणी महागंभीरनिर्घोषानभोनादयतीतदा ३४ शृण्वतांसर्वभूतानांतेषांचाश्रमवासिनां कुंतीमाभाष्यविस्प
ष्टमुवाचेदंशुचिस्मितां ३५ कार्त्तवीर्यसमःकुंतिशिवतुल्यपराक्रमः एषशक्रइवाजय्योयशस्तेप्रथयिष्यति ३६ अदित्याविष्णुना
प्रीतिर्यथाभूदभिवर्द्धिता तथाविष्णुसमःप्रीतिंवर्द्धयिष्यतितेऽर्जुनः ३७ एषमद्रान्वशेकृत्वाकुरूंश्चसहसोमकैः चेदिकाशिकरूषांश्च
कुरुलक्ष्मीवहिष्यति ३८ एतस्यभुजवीर्येणखांडवेहव्यवाहनः मेदसासर्वभूतानांतृप्तियास्यतिवैपरां ३९ ग्रामणीश्चमहीपा
लानेषजित्वामहाबलः भ्रातृभिःसहितोवीरस्त्रीन्मेधानाहरिष्यति ४० जामदग्न्यसमःकुंतिविष्णुतुल्यपराक्रमः एषवीर्यवतांश्रेष्ठो
भविष्यतिमहायशाः ४१ एषयुद्धेमहादेवंतोषयिष्यतिशंकरं अस्त्रंपाशुपतंनामतस्मात्तुष्टादवाप्स्यति ४२ ॥ ॥

रा०
२२६

४ ५ देवनिकायानांदेवतानिलयानांविमानानांतेनततस्मांतेदेवाना ॰मितिलक्ष्यते ४६

निवातकवचानामदैत्याविबुधविद्विषः शक्राज्ञयामहावाहुस्तान्ववधिष्यतितेसुतः ४३ तथादिव्यानिचास्त्राणिनिखिलेनाहरि
ष्यतिविप्रनष्टांश्रियचायमाहर्त्तापुरुषर्षभः ४४ एतामत्यद्भुतांवाचंकुंतीशुश्रावसूतके वाचमुच्चरितामुच्चैस्तांनिशम्यतपस्विनां ४५
वभूवपरमोहर्षःशतशृंगनिवासिनां तथादेवनिकायानांसेंद्राणांचदिवौकसां ४६ आकाशेदुंदुभीनांचवभूवतुमुलःस्वनः उद
तिष्ठन्महाघोषःपुष्पवृष्टिभिरावृतः ४७ समवेत्यचदेवानांगणाःपार्थमपूजयन् काद्रवेयावैनतेयागंधर्वाप्सरसस्तथा प्रजानांपत
यःसर्वेसप्तचैवमहर्षयः ४८ भरद्वाजःकश्यपोगौतमश्चविश्वामित्रोजमदग्निर्वसिष्ठः यश्चोदितोभास्करेभूत्प्रनष्टेसोप्यत्रात्रिर्भग
वानाजगाम ४९ मरीचिरंगिराश्चैवपुलस्त्यःपुलहःक्रतुः दक्षःप्रजापतिश्चैवगंधर्वाप्सरसस्तथा ५० दिव्यमाल्यांवरधराःसर्वा
लंकारभूषिताः उपगायंतिवीभत्सुंनृत्यंतेप्सरसोगणाः ५१ तथामहर्षयश्चापिजेपुस्तत्रसमंततः गंधर्वैःसहितःश्रीमान्प्रागायतच
तुंवुरुः ५२ भीमसेनोग्रसेनौचऊर्णायुरनघस्तथा गोपतिर्धृतराष्ट्रश्चसूर्यवर्चास्तथाष्टमः ५३ युगपस्तृणपःकार्ष्णिर्नंदिश्चित्ररथस्त
था त्रयोदशःशालिशिराःपर्जन्यश्चचतुर्दश ५४ कलिःपंचदशश्चैवनारदश्चात्रषोडश सत्वावृहद्वावृहकःकरालश्चमहामनाः
५५ ब्रह्मचारीवहुगुणःसुवर्णश्चेतिविश्रुतः ॥ ॥

विश्वावसुर्भुमन्युश्च सुचंद्रश्च शरुस्तथा ५६ गीतमाधुर्यसंपन्नौ विख्यातौ च हहाहुहू इत्येते देवगंधर्वा जगुस्तत्र नराधिप ५७ तथैवा
प्सरसो हृष्टाः सर्वालंकारभूषिताः ननृतुर्वै महाभागा जगुश्चायतलोचनाः ५८ अनूचानानवद्या च गुणमुख्या गुणावरा अद्रिका च त
था सोमा मिश्रकेशी त्वलंबुषा ५९ मरीचिः शुचिका चैव विद्युत्पर्णा तिलोत्तमा अद्रिका लक्ष्मणा क्षेमा देवी रंभा मनोरमा ६० असिता
च सुबाहुश्च सुप्रिया च वपुस्तथा पुंडरीका सुगंधा च सुरसा च प्रमाथिनी ६१ काम्या शारद्वती चैव ननृतुस्तत्र संहृष्टाः मेनका सहजन्या
च कर्णिका पुंजिकस्थला ६२ ऋतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि उम्लोचेति विख्याता प्रम्लोचेति च ता दश ६३ उर्वश्येका
दशी तासां जगुश्चायतलोचनाः धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ६४ इंद्रो विवस्वान्पूषा च त्वष्टा च सविता तथा पर्जन्यश्चैव
विष्णुश्च आदित्या द्वादश स्मृताः महिमानं पांडवस्य वर्द्धयंतो वरे स्थिताः ६५ मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः अजैकपा
दहिर्बुध्न्यः पिनाकी च परंतप ६६ दहनोथेश्वरश्चैव कपाली च विशांपते स्थाणुर्भगश्च भगवान्रुद्रास्तत्रावतस्थिरे ६७ अश्वि
नौ वसवश्चाष्टौ मरुतश्च महाबलाः विश्वेदेवास्तथा साध्यास्तत्रासन्परिसंस्थिताः ६८ कर्कोटकोथ सर्पश्च वासुकिश्च भुजंगमः
कच्छपश्चाप्यकुंडश्च तक्षकश्च महोरगः ६९ आययुस्तेजसा युक्ता महाक्रोधा महाबलाः एते चान्ये च बहवस्तत्र नागा व्यवस्थिताः
७० तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्चासितध्वजः अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः ७१ ॥ ॥ ॥ ॥

७६ अध्यायः १२२ कुंती १ विगुणोप्रज्ञोमाद्रनानधिकृते अवरत्वेकनिष्ठापत्नेवराहीयाः कुंत्या अपेक्षया २ ५ संरंभः अभिमानः ६ ममेतिरिष्टमनिष्टं वा वक्ष्यसीति संदेहे

नांश्च देवगणान्सर्वांस्तपःसिद्धामहर्षयः विमानतिर्यग्नगतान्दृष्ट्वा पुनर्नतरेजनाः ७२ तं दृष्ट्वा महदाश्चर्यं विस्मितामुनिसत्तमाः
अधिकांस्मततोहृत्तिमवर्तन्पांडवान्प्रति ७३ पांडुस्तु पुनरेवैनां पुत्रलोभान्महायशाः वक्तुमैच्छद्धर्मपत्नीं कुंतीं त्वेनमथाब्रवीत् ७४
नातश्चतुर्थंप्रसवमापत्स्वपिवदंत्युत अतःपरंस्वैरिणीस्याद्बंधकीपंचमेभवेत् ७५ सत्वंविद्वन्धर्ममिममधिगम्यकथंनुमां अपत्यार्थं
समुत्क्रम्यप्रमादादिवभाषसे ७६ इत्यादिपर्वणिपांडवोत्पत्तौ १२२ वैशंप कुंतीपुत्रेषुजातेषुधृतराष्ट्रात्मजेषुच मद्रराजसुतापां
डुंरहोवचनमब्रवीत् १ नमेस्तित्वयिसंतापोविगुणेपिपरंतप नावरत्वेवराहीयाःस्थित्वाचानघनित्यदा २ गांधार्याश्चैवनृपतेजातं
पुत्रशतंतथा श्रुत्वानमेतथादुःखमभवत्कुरुनंदन ३ इदंतुमेमहद्दुःखंतुल्यतायामपुत्रता दिष्ट्यात्विदानींभर्तुर्मेकुंत्यामप
त्यस्तिसंततिः ४ यदित्वमन्यसंतानंकुंतिराजसुतामपि कुर्यादनुग्रहोमेस्यात्तवचापिहितंभवेत् ५ संस्तंभोहिसपत्नीत्वात्वक्तुं
कुंतिसुतांप्रति यदितुत्वंप्रसन्नोमेस्वयमेनांप्रचोदय ६ पांडुरु च ममाप्येषसदामाद्रिहृद्यर्थःपरिवर्तते नतुत्वांप्रसहेवक्तु
मिष्टानिष्टविवक्षया ७ ॥

नत्वांवक्तुंनप्रसहेइत्यर्थःमत्वाज्ञात्वाप्रतिपत्स्यतेअंगीकरिष्यति ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

८ संतानं अविछेदं लोकस्यप्रियं बलवन्नजात्वेननिर्भयत्वं ९ ममपूर्वेषांच अपिंडविनाशाय पिंडविनाशाभावाय बहुषुपुत्रेषुकश्चिदपिपु

त्वन्नस्त्विदमहंत्वात्वाप्रयतिष्यामतःपरं मन्येकवंमयोक्तासावचनंप्रतिपत्स्यते ८ वैशंपायनउ च ततःकुंतीपुनःपांडुर्वि
विक्तइदमब्रवीत कुलस्यममसंतानंलोकस्यचकुरुप्रियं ९ ममचापिंडनाशायपूर्वेषामपिचात्मनः मत्प्रियार्थंचकल्याणिकु
रुकल्याणमुत्तमं १० यशसोर्थायचैवत्वंकुरुकर्मसुदुष्करं प्राप्याधिपत्यमिंद्रेणयज्ञैरिष्टंयशोर्थिना ११ तथामंत्रविदोविप्रास्त
पस्तप्त्वासुदुष्करं गुरूनभ्युपगछंतियशसोर्थायभाविनि १२ तथाराजर्षयःसर्वेब्राह्मणाश्चतपोधनाः चक्रुरुच्चावचंकर्मयश
सोर्थायदुष्करं १३ सात्वंमाद्रींप्लवेनेवतारयेनामनिंदिते अपत्यसंविभागेनपरांकीर्तिमवाप्नुहि १४ एवमुक्ताब्रवीन्माद्रींस
कृच्चिंतयदैवतं तस्मात्तेभवितापत्यमनुरूपमसंशयं १५ ततोमाद्रीविचार्यैवजगाममनसाश्विनौ तावागम्यसुतौतस्यांजनया
मासतुर्यमौ नकुलंसहदेवंचरूपेणाप्रतिमौभुवि तथैवतावपियमौवागुवाचाशरीरिणी १७ सत्वरूपगुणोपेतौभवतोत्यश्विना
विति भासतस्तेजसात्यर्थंरूपद्रविणसंपदा १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्रस्यसंततेरविछेदःसंभवादिसर्थः कल्याणंपुत्रोत्तरोत्पादने १० यशसइतिकृतकृत्वा अपियशोर्थंदेवगुर्वाद्याराधनंकुर्वंतीत्यर्थः ११ १४ एवंपांडुनोक्ताकुंत्या
मंत्रेकृतेसतिकुंतीमाद्रींअब्रवीदितियोजना अत्राश्विनौ अश्विभ्यामधिकौ १७ १८

अनुसंवत्सरं [illegible] संवत्सरमनुपश्चाज्जाता अपि देवताभावात्सर्वे यंवसंवत्सरा इवादृश्यंते स्म पं:। यदायं चापि पुत्रा व्यराजंत संवत्सराः प्रभवादय इवानुसंवत्सरं जाताः इति योजनं २२ ३०

नामानि चक्रिरे तेषां शतशृंगनिवासिनः भक्त्या च कर्मणा चैव तथाशीर्भिर्विशांपते १९ ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमं अर्जुने
ति तृतीयं च कुंतीपुत्रानकल्पयन् २० पूर्वजं नकुलेत्येवं सहदेवेति चापरं माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः अनुसंवत्सरं जा
ता अपि ते कुरुसत्तमाः पांडुपुत्रा व्यराजंत पंच संवत्सरा इव २२ महासत्वा महावीर्या महाबलपराक्रमाः पांडुर्दृष्ट्वा सुतांस्तांस्तु देवरूपान्म
हौजसः २३ मुदं परमिकां लेभे ननंद च नराधिपः ऋषीणामपि सर्वेषां शतशृंगनिवासिनां २४ प्रिया बभूवुस्तासां च तथैव मुनियो
षितां कुंतीमथ पुनः पांडुर्माद्र्यर्थे समचोदयत् २५ तमुवाच पृथा राजन्रहस्युक्ता तदा सती उक्ता सकृद्द्वंद्वमेषा लेभे तेनास्म्यहं वंचिता
२६ बिभेम्यस्याः परिभवात्कुस्त्रीणां गतिरीदृशी नाज्ञासिषमहं मूढा द्वंद्वाह्वाने फलद्वयं तस्मान्नाहं नियोक्तव्या त्वयैषोस्तु वरो मम २७
एवं पांडोः सुताः पंच देवदत्ता महाबलाः संभूताः कीर्तिमंतस्ते कुरुवंशविवर्द्धनाः २८ शुभलक्षणसंपन्नाः सोमवत्प्रियदर्शनाः
सिंहदर्पा महेष्वासाः सिंहविक्रांतगामिनः २९ सिंहग्रीवा मनुष्येंद्रा ववृधुर्देवविक्रमाः विवर्द्धमानास्ते तत्र पुण्ये हैमवते गिरौ वि
स्मयं जनयामासुर्महर्षीणां समेयुषां ३० ते च पंच शतं चैव कुरुवंशविवर्द्धनाः सर्वे ववृधुरल्पेन कालेनाप्स्विव नीरजाः ३१ इत्यादिप
र्वणि १२३ वैशंपायन उ च दर्शनीयास्ततः पुत्राः पांडोः पंच महावने तान्पश्यन्पर्वते रेमे स्वबाहुबलमाश्रितः १ ७ ७

ते च पांडवाः शतं चान्ये धार्त्तराष्ट्राः नीरजाः पद्मानीव ३१ अध्यायः १२३ दर्शनीयानिति १॥ ॥ ७ ॥ ॥ ७ ॥

मधुमाधवेचैत्रवैशाखयोःसंधौतदात्मकेवसंते १५ वयःस्थायुवतीतनुवाससंसूक्ष्मवस्त्रांकिंचितविहृतांगामितर्षः ६ ८ परीतात्माकामेनव्याप्तचित्तः ९ १० बुद्धिर्मृत्युनिस्सृप्तः

सुपुष्पितवनेकालेकदाचिन्मधुमाधवे भूतसंमोहनेराजासभार्योव्यचरद्वनं २ पलाशैस्तिलकैश्चूतैश्चंपकैःपारिभद्रकैः अन्यैश्चब
हुभिर्वृक्षैःफलपुष्पसमृद्धिभिः ३ जलस्थानैश्चविविधैःपद्मिनीभिश्चशोभितं पांडुर्वनंतत्संप्रेक्ष्यप्रजज्ञेहृदिमन्मथः ४ प्रहृष्टमनसं
तत्रविचरंतंयथामरं तंमाद्र्यनुजगामैकावसनंबिभ्रतीशुभं ५ समीक्षमाणःसतुतांवयस्थांतनुवाससं तस्यकामःप्रववृधेगहनेग्नि
रिवोद्गतः ६ रहस्येकांतुतांदृष्ट्वाराजाराजीवलोचनां नशशाकनियंतुंतंकामंकामवशीकृतः ७ ततएनांबलाद्राजानिजग्राहर
होगतां वार्यमाणस्तयादेव्याविस्फुरंत्यायथाबलं ८ सतुकामपरीतात्मातंशापंनान्वबुध्यत माद्रींमैथुनधर्मेणसोन्वगच्छद्बला
दिव ९ जीवितांतायकौरव्यमन्मथस्यवशंगतः शापजंभयमुत्सृज्यविधिनासंप्रचोदितः १० तस्यकामात्मनोबुद्धिःसाक्षात्कालेन
मोहिता संप्रमथ्येंद्रियग्रामंप्रनष्टासहचेतसा ११ सतयासहसंगम्यभार्ययाकुरुनंदनः पांडुःपरमधर्मात्मायुयुजेकालधर्मणा १२
ततोमाद्रीसमालिंग्यराजानंगतचेतसं मुमोचदुःखजंशब्दंपुनःपुनरतीवहि १३ सहपुत्रैस्ततःकुंतीमाद्रीपुत्रौचपांडवौ आ
जग्मुःसहितास्तत्रराजायत्रतथागतः १४ ततोमाद्र्यब्रवीद्राजन्नार्ताकुंतीमिदंवचः एकैवत्वमिहागच्छतिष्ठंत्वत्रैवदारकाः १५

चेतसाविचारेण ११ कालस्यातीतत्वाद्व्यवहारहेतोःषष्ठद्रव्यस्यैवधर्मःकालनामकोपसमरणासंतेन १२ १३ १४ ॥

१७ अत्यतिक्रांतः त्वां बलादाक्रांतवान् शोकाकुलत्वादिति शब्दाभ्यासः १८ १९ प्रहर्षः कामः २० २१ आत्मा चित्तं दिष्टं शापजं दुरदृष्टं २२ २३ अन्विष्यामि अनुगमिष्यामि २४

तच्छ्रुत्वा वचनं तस्मात्तत्रैवाधार्यदारकान् हताहमिति विक्रुश्य सहसैवाजगाम सा १६ दृष्ट्वा पांडुं च माद्रीं च शयानौ धरणीतले कुंती
शोकपरीतांगी विललाप सुदुःखिता १७ रक्ष्यमाणो मया नित्यं वीरः सततमात्मवान् कथं त्वामत्यतिक्रांतः शापं जानन्वनौकसः १८
ननु नाम त्वया माद्रि रक्षितव्यो जनाधिपः सा कथं लोभितवती विजने त्वं नराधिपं १९ कथं दीनस्य सततं त्वामासाद्य रहोगतां तं विचिंतयतः
शापं प्रहर्षः समजायत २० धन्या त्वमसि बाल्हीकि मत्तो भाग्यतरा तथा दृष्टवत्यसि यद्वक्त्रं प्रहृष्टस्य महीपतेः २१ माद्र्यु च विलपंत्या
मया देवि वार्यमाणेन चासकृत् आत्मा न वारितोनेन सत्यं दिष्टं चिकीर्षुणा २२ कुंत्यु च अहं ज्येष्ठा धर्मपत्नी ज्येष्ठं धर्मफलं मम अ
वश्यंभाविनो भावान्मा मां माद्रि निवर्तय २३ अन्विष्यामिह भर्तारमहं प्रेतवशंगतं उत्तिष्ठ त्वं विसृज्यैनमिमान्पालय दारकान् २४ माद्र्यु
वाच अहमेवानुयास्यामि भर्तारमपलायिनं न हि तृप्तास्मि कामानां ज्येष्ठा मामनुमन्यतां २५ मां चाभिगम्य क्षीणोयं कामाद्भरतसत्त
मं तमुच्छिंद्यामस्य कामं कथं नु यमसादने २६ न चाप्यहं वर्तयंती निर्विशेषं सुतेषु ते वृत्तिमार्ये चरिष्यामि स्पृशेदेनस्तथा च मां २७ तस्मा
न्मे सुतयोः कुंति वर्तितव्यं स्वपुत्रवत् मां च कामयमानोयं राजा प्रेतवशंगतः २८ राज्ञः शरीरेण सह ममापीदं कलेवरं दग्धव्यं सुप्रतिच्छ
न्नमेतदार्ये प्रियं कुरु २९ दारकेष्वप्रमत्ता च भवेथाश्च हितं मम अतोन्यन्न प्रपश्यामि संदेष्टव्यं हि किंचन ३० ॥ ॥ ॥

मा५ ॥ ॥ ॥ ॥ ॥

२५ २६ २७ २८ २९ ३० ॥ ॥ ॥ ॥ ॥

आ॰
२३०

३१ अध्यायः पांडोरुपरमंदृष्ट्वेत्यादि ३२ देहंदेहयोरस्थीनिअग्निहोत्राग्निभिःसंस्कारलंभनार्थं ७ ७ तत्तगमनंसंक्षिप्तममन्यतमुनीनांयोगप्रभावात्स्वदेशगमनौत्कंठ्याद्वा ८

इत्युक्त्वातंचिताग्निस्थंधर्मपत्नीनरर्षभं मद्रराजसुतातूर्णमन्वारोहद्यशस्विनी ३१ इत्यादिपर्वणिसंभवे १२४ वैशं॰ पांडोरुपरमंदृष्ट्वादे
वकल्पामहर्षयः ततोमंत्रविदःसर्वेमंत्रयांचक्रिरेमिथः १ तापसाऊचुः हित्वाराज्यंचराष्ट्रंचसमहात्मामहायशाः अस्मिन्स्थानेतपस्त
प्त्वातापसाञ्छरणंगतः २ सजातमात्रान्पुत्रांश्चदारांश्चभवतामिह प्रादायोपनिधिंराजापांडुःस्वर्गमितोगतः ३ तस्येमानात्मजान्देहंभार्यां
चसुमहात्मनः स्वराष्ट्रंगृह्यगच्छामोधर्मएवहिनःस्मृतः ४ वैशंपायनउ॰ च तेपरस्परमामंत्र्यदेवकल्पामहर्षयः पांडोःपुत्रान्पुरस्कृत्यन
गरंनागसाह्वयं ५ उदारमनसःसिद्धागमनेचक्रिरेमनः भीष्मायपांडवान्दातुंधृतराष्ट्रायचैवह ६ तस्मिन्नेवक्षणेसर्वेतानादायप्रत
स्थिरे पांडोर्दारांश्चपुत्रांश्चशरीरंतेचतापसाः ७ सुखिनीसापुराभूत्वासततंपुत्रवत्सला प्रपन्नादीर्घमध्वानंसंक्षिप्तंतदमन्यत ८ सानदी
र्घेणकालेनसंप्राप्ताकुरुजांगलं वर्द्धमानपुरद्वारमाससादयशस्विनी ९ द्वारिणंतापसाऊचूराजानंचप्रकाशयंतेत्रगत्वाक्षणेनैवस
भायांविनिवेदिताः १० तंचारणसहस्राणांमुनीनामागमंतदा श्रुत्वानागपुरेनृणांविस्मयःसमपद्यत ११ मुहूर्तोदितआदित्येसर्वेबा
लपुरस्कृताः सदारास्तापसान्द्रष्टुंनिर्ययुःपुरवासिनः १२ स्त्रीसंघाःक्षत्रसंघाश्चयानसंघसमास्थिताः ब्राह्मणैःसहनिर्जग्मुर्ब्राह्मणा
नांचयोषितः १३ तथाविट्शूद्रसंघानांमहान्व्यतिकरोभवत् नकश्चिदकरोदीर्ष्यामभवन्धर्मबुद्धयः १४ ॥ ॥ ॥

वर्द्धमानपुरद्वारंमुख्यंद्वारं ९ १० चारणाःगुह्यकास्तेषांसहस्राणांमुनीनांचाआगममितिचोध्याहर्तव्यः पाठांतरेआरण्यानांसहस्रसंख्यानांमुनीनांचेतियोज्यं ११ १२ १३
व्यतिकरःसंघर्षः १४ ॥

राम॰
२३०

११ कौसल्याकाशिराजसुता: १६ १९ अकूजंतनि:शब्दं २० २१ द्विजेनहेतुनामंत्रेणदेवताह्वानांचलौकिकेनकारणेन २३ २४ २५ २६ २७ २८ २९ ३०

ततोभीष्मःशांतनवःसोमदत्तोथवाल्हिकः प्रज्ञाचक्षुश्चराजर्षिःक्षत्ताचविदुरःस्वयं १५ साचसत्यवतीदेवीकौशल्याचयशस्विनी राजदारैःपरिवृतागांधारीचापिनिर्ययौ १६ धृतराष्ट्रस्यदायादादुर्योधनपुरोगमाः भूषिताभूषणैश्चित्रैःशतसंख्याविनिर्ययुः १७ तान्महर्षिगणान्दृष्ट्वाशिरोभिरभिवाद्यच उपोपविविशुःसर्वेकौरव्याःसपुरोहिताः १८ तथैवशिरसाभूमावभिवाद्यप्रणम्यच उपोपविविशुःसर्वेपौरजानपदाअपि १९ तमकूजमभिज्ञायजनौघंसर्वशस्तदा पूजयित्वायथान्यायंपाद्येनार्घ्येणचप्रभो २० भीष्मोराज्यंचराष्ट्रंचमहर्षिभ्योन्यवेदयन् तेषामथोवृद्धतमःप्रत्युत्थायजटाजिनी २१ ऋषीणांमतमाज्ञायमहर्षिरिदमब्रवीत् यःसकौरव्यदायादःपांडुर्नामनराधिपः कामभोगान्परित्यज्यशतशृंगमितोगतः २२ ब्रह्मचर्यव्रतस्थस्यतस्यदिव्येनहेतुना साक्षाद्धर्माद्यंपुत्रस्तत्रजातोयुधिष्ठिरः २३ तथैनंबलिनांश्रेष्ठंतस्यराज्ञोमहात्मनः मातरिश्वाददौपुत्रंभीमंनाममहाबलं २४ पुरुहूतादयंजज्ञेकुंत्यांसत्यपराक्रमः यस्यकीर्त्तिर्महेष्वासान्सर्वानभिभविष्यति २५ यौतुमाद्रीमहेष्वासावसूतपुरुषोत्तमौ अश्विभ्यांपुरुषव्याघ्राविमौतावपिपश्यतः २६ चरताधर्मनित्येनवनवासंयशस्विना नष्टःपैतामहोवंशःपांडुनापुनरुद्धृतः २७ पुत्राणांजन्मवृद्धिंचवैदिकाध्ययनानिच पश्यंतःसततंपांडोःपरांप्रीतिमवाप्स्यथ २८ वर्त्तमानःसतांवृत्तेपुत्रलाभमवाप्यच पितृलोकंगतःपांडुरितःसप्तदशेहनि २९ तंचितागतमाज्ञायवैश्वानरमुखेहुतं प्रविष्टापावकंमाद्रीहित्वाजीवितमात्मनः ३० सागतासहतेनैवपतिलोकमनुव्रता तस्यास्तस्यचयत्कार्यंक्रियतांतदनंतरं ३१ ॥ ॥

३१ ३२ ॥ ॥ ॥

२१ प्रेतकार्ये लौकिकाग्निना दाहमात्रे पितृमेधं अग्निहोत्राग्निभिर्विधिवद्दाहं ३३ ३४ गंधर्वनगरं खपुरं ३५ यथोक्तं ज्योतिःशास्त्रे अनेकरत्नाकृतिः खे प्रकाशते पुरं पताका

इमे तयोः शरीरे द्वे पुत्राश्चेमे तयोर्वराः क्रियाभिरनुगृह्यंतां सह मात्रा परंतपाः ३२ प्रेतकार्ये निवृत्ते तु पितृमेधं महायशाः लभतां स
र्वधर्मज्ञः पांडुः कुरुकुलोद्वहः ३३ वैशंपायन उवाच एवमुक्त्वा कुरून्सर्वान्कुरूणामेव पश्यतां क्षणेनांतर्हिताः सर्वे तापसा गुह्यकैः
सह ३४ गंधर्वनगराकारं तत्रैवांतर्हितं पुनः ऋषिसिद्धगणं दृष्ट्वा विस्मयं ते परं ययुः ३५ इत्यादिपर्वणि संभवे १२५ धृतराष्ट्र उवाच
पांडोर्विदुर सर्वाणि प्रेतकार्याणि कारय राजवद्राजसिंहस्य माद्र्याश्चैव विशेषतः १ पशून्वासांसि रत्नानि धनानि विविधानि च पां
डोः प्रयच्छ माद्र्याश्च येभ्यो यावच्च वांछितं २ यथा च कुंती सत्कारं कुर्यान्माद्र्यास्तथा कुरु यथा न वायुर्नादित्यः पश्यतां तां सुसंवृतां
३ न शोच्यः पांडुरनघः प्रशस्यः स नराधिपः यस्य पंच सुता वीरा जाताः सुरसुतोपमाः ४ वैशंपायन उवाच विदुरस्तं तथेत्युक्त्वा भीष्मे
ण सह भारत पांडुं संस्कारयामास देशे परमपूजिते ५ ततस्तु नगरात्तूर्णमाज्यगंधपुरस्कृतः निर्हृताः पावका दीप्ताः पांडो राजन्पुरो
हितैः ६ अथैनमार्त्तवैः पुष्पैर्गंधैश्च विविधैर्वरैः शिबिकां तामलंकृत्य वाससाच्छाद्य सर्वशः ७ तां तथा शोभितां माल्यैर्वासोभिश्च महा
धनैः अमात्या ज्ञातयश्चैनं सुहृदश्चोपतस्थिरे नृसिंहं नरयुक्तेन परमालंकृतेन तं अवहन्यानमुख्येन सह माद्र्या सुसंवृतं ८ पां
डुरेणातपत्रेण चामरव्यजनेन च सर्ववादित्रनादैश्च समलंचक्रिरे ततः १० रत्नानि चाप्युपादाय बहूनि शतशो नराः प्रददुः कांक्ष
माणेभ्यः पांडोस्तस्यौर्ध्वदेहिके ११ ॥

ध्वजेन तोरणान्वितां यदा तदा नागमनुष्यवाजिनां पिबत्समस्कृत्मरिरिरो वसुंधरेति अध्यायः पांडो ८ नृसिंहं पांडुं नृसिंहेति पाठे जनमेजयसंबोधनं ६ १० ११ ॥

१७ कालियकादिग्धंहस्यागरुलिप्तं १८ २२ तुंगपद्मकौगंधद्रव्यविशेषो २३ ॥

अथ छत्राणिशुभ्राणिचामराणिवृहंतिच आजह्रुः कौरवस्यार्थेवासांसिरुचिराणिच १२ याजकैः शुक्लवासोभिर्हूयमाना
हुताशनाः आगच्छन्नग्नतस्तस्यदीप्यमानाः स्वलंकृताः १३ ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चैवसहस्रशः रुदंतः शोकसंतप्ता अनु
जग्मुर्नराधिपं १४ अयमस्मानपहायदुःखेचाधायशाश्वते कृत्वाचास्माननाथांश्च क्वयास्यसिनराधिप १५ क्रोशंतः पांडवाः सर्वे
भीष्मोविदुरएवच रमणीयेवनोद्देशेगंगातीरेसमेशुभे १६ न्यासयामासुरथतांशिबिकांसत्यवादिनः सभार्यस्यनृसिंहस्यपांडोरक्लि
ष्टकर्मणः १७ ततस्तस्यशरीरंतुसर्वगंधनिवासितं शुचिकालीयकादिग्धंदिव्यचंदनरूषितं १८ पर्यषिंचनजलेनाशुशातकुंभ
मयैर्घटैः चंदनेनचशुक्लेनसर्वतः समलेपयन् १९ कालागुरुविमिश्रेणतथातुंगरसेनच अथैनंदेशजैः शुक्लैर्वासोभिः समयो
जयन् २० संछन्नः सतुवासोभिर्जीवन्निवनराधिपः शुशुभेसनरव्याघ्रोमहार्हशयनोचितः २१ याजकैरभ्यनुज्ञातंप्रेतकर्मण्यनुष्ठिते
घृतावसिक्तोराजानंसहमाद्र्यास्वलंकृतं २२ तुंगपद्मविमिश्रेणचंदनेनसुगंधिना अन्यैश्चविविधैर्गंधैर्वह्निश्चसमदाहयन् २३
ततस्तयोः शरीरेद्वेदृष्ट्वामोहवशंगताः हाहापुत्रेतिकौशल्यापपातसहसाभुवि २४ तांप्रेक्ष्यपतितामार्त्तांपौरजानपदोजनः रुरो
ददुःखसंतप्तोराजभक्त्याकृपान्वितः २५ क्लांताश्चैवार्त्तनादेनसर्वाणिचविचुक्रुशुः मानुषैः सहभूतानितिर्यग्योनिगतान्यपि २६
तथाभीष्मः शांतनवोविदुरश्चमहामतिः सर्वशः कौरवाश्चैवप्राणदंनभृशदुःखिताः २७ ततोभीष्मोथविदुरोराजाचसहपांडवैः
उदकंचक्रिरेतस्यसर्वाश्चकुरुयोषितः २८ ॥ ॥ ॥

३१ अध्याय १२६ ततः ५ श्वः श्वः पर्वपूर्वाद्दिनोपक्षया उत्तरमञ्जसंपापिष्ठा दिवसाः गतयौवनासमक्फलभूत्ता ६ ७ योगंप्रयाणोयोगंचित्तवृत्तिनिरोधं वा युक्ता

वृत्तस्यु पांडवाः सर्वेभीष्मः शांतनवस्तथा विदुरोऽस्मानपश्चैवचक्षुष्मान्परकक्रियाः २६ ततोऽद्यकौसल्यांनादायपांडवांश्छोककर्शि
तान् सर्वाः प्रकृतयोराजंश्चोचंमानान्ववारयन् ३० यथैवपांडवामम्मौमुष्णुः सहबांधवैः तथैवनागराजस्त्रिशिंशिशोब्राह्मणा
दयः ततोऽत्तानंरमस्त्रसरस्वकाकुमारमहस्रवत् बभूवपांडवैःसार्द्धनगरं नादशक्षयाः ३२ इत्यादिपर्वणिराजसमभवे २६ ततःकुंतीचराजा
चभीष्मश्चसहबंधुभिः दद्युःश्राद्धं तदापांडोःस्वधामृतममंतदा १ कुरूंश्चविप्रमुख्यांश्चभोजयित्वासहस्रशः रत्नौघानविप्रमुख्येभ्यो
दत्वाग्रामवरांस्तथा २ कृतशौचांस्ततस्तांस्तुपांडवान्भरतर्षभान् आदायविविशुःसर्वेपुरंवारणसाह्वयं सततंस्मानुशोचंतस्तमे
वभरतर्षभं पौरजानपदाःसर्वेमृतंस्वमिवबांधवं ४ श्राद्धावसानेतुतदादृष्ट्वातंदुःखितंजनं सम्मूढांदुःखशोकार्त्तांव्यासोमातरमे
ब्रवीत् ५ अतिक्रांतसुखाःकालाःपर्युपस्थितदारुणाः श्वःश्वःपापिष्ठदिवसाःपृथिवीगतयौवना ६ बहुमायासमाकीर्णो
नानादोषसमाकुलः लुप्तधर्मक्रियाचारोघोरःकालोभविष्यति ७ कुरूणामनयाच्चापिपृथिवीनभविष्यति गच्छत्वंयोगमास्थ्या
यमुक्तावसतपोवने ८ माद्राक्षीस्त्वंकुलस्यास्यघोरंसंक्षयमात्मनः तथेतिसमनुज्ञायसाप्रविश्याब्रवीत्स्नुषां ९ अंबिकेतववयो
त्रस्यदुर्नयात्किलभारताः सानुबंधाविनंक्ष्यंतिपौराश्चैवेतिनःश्रुतं तत्कौशल्यामिमामार्त्तांपुत्रशोकाभिपीडितां वनमादायभद्रं
तेगच्छामयदिमन्यसे १० तथेत्युक्तात्वंविकया [illegible] भीष्ममामंत्र्यसुव्रता वनंययौसत्यवतीस्नुषाभ्यांसहभारत ११ ताःसुघोरंतपस्त
प्त्वादेव्योभरतसत्तम देहंत्यक्त्वामहाराजगतिमिष्टांययुस्तदा १२ ॥ ॥ ॥ ॥

समाहिता ८ श्रीरामोजयती ॥ ॥ ॥

१५ जवेधावनक्रीडायांलक्ष्याभिहरणेऽग्रहरणेलक्ष्यफलादेर्हरणेभोज्येपांसुविकर्षणेवालक्रीडाविशेषेपरिमर्दतिसर्वतउपमर्दयति १९ १८ योग्यासुशिक्षाभ्या

नाति

वैशंपायनउवाच अथपाण्डवंतोवेदोक्तान्संस्कारान्पाण्डवास्तदा संवर्द्धंतभोगांस्तेभुंजानाःपितृवेश्मनि १३ धार्त्तराष्ट्रैश्चसहिताःक्रीडंतोमुदिताःसुखं वालक्रीडासुसर्वासुविशिष्टास्तेजसाभवत् १४ जवेलक्ष्याभिहरणेभोज्येपांसुविकर्षणे धार्त्तराष्ट्रान्भीमसेनःसर्वान्सपरिमर्दति १५ हर्षात्प्रक्रीडमानांस्तान्गृह्यराजन्निलीयते शिरःसुचनिगृह्यैतान्योधयामासपांडवः १६ शतमेकोत्तरंतेषांकुमाराणांमहौजसां एकएवनिगृह्णातिनातिकृच्छ्राद्वृकोदरः कचेषुचनिगृह्यैनान्विनिहत्यवलाद्वली चकर्षक्रोशतोभूमौघृष्टजानुशिरोंसकान् १८ दशवालान्जलेक्रीडन्भुजाभ्यांपरिगृह्यसः आस्तेस्मसलिलेमग्नोमृतकल्पान्विमुंचति १७ फलानिवृक्षमारुह्यविचिन्वंतिचतेयदा तदापादप्रहारेणभीमःकंपयतिद्रुमान् प्रहारवेगाभिहताद्द्रुमाद्व्याघूर्णितास्ततः सफलाःप्रपतंतिस्मद्रुतंत्रस्ताःकुमारकाः १९ नतेनियुद्धेनजवेनयोग्यासुकदाचन कुमाराउत्तरंचक्रुःस्पर्द्धमानावृकोदरं २० एवंसधार्त्तराष्ट्राणांस्पर्द्धमानोवृकोदरः अप्रियेतिष्ठदत्यंतंवाल्यान्नद्रोहचेतसा २१ ततोवलमतिख्यातंधार्त्तराष्ट्रःप्रतापवान् भीमसेनस्यतज्ज्ञात्वादुष्टभावमदर्शयत् २२ तस्यधर्मादपेतस्यपापानिपरिपश्यतः मोहादैश्वर्यलोभाच्चपापामतिरजायत अयंवलवतांश्रेष्ठःकुंतीपुत्रोवृकोदरः मध्यमःपांडुपुत्राणांनिकृत्यासन्निगृह्यतां २३ प्राणवान्विक्रमीचैवशौर्येणमहतान्वितः स्पर्द्धतेचापिसहितानस्मानेकोवृकोदरः २४ तंतुसुप्तंपुरोद्यानेगंगायांप्रक्षिपामहे अथतस्मादवरजंश्रेष्ठंचैवयुधिष्ठिरं प्रसह्यवंधनेवध्वाप्रशासिष्येवसुंधरां २५

पृ४

सेषुउत्तरंउत्कर्षं १९ २० २२ निकृत्याकपटेन २३ प्रसह्यवलात्कारेण २४ २५ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

२८ प्रमाणकोट्यांगंगायांप्रदेशविशेषेस्थलंकिंचित्अर्धंजलेअर्धंस्थलेचक्रीडागारं २९ भक्ष्यंदंतै[illegible]र्लेह्यग्राह्यं अपूपादिभोज्यंनिष्काथ्यापारमात्रेणग्राह्यं पायसादि पेयंतदुग्धपानपेयं पानकादि चोष्यंरसमात्रंगृहीत्वात्याज्यमिक्षुदंडादि लेह्यंमुखलालयाद्रवीभावमापद्यमानंखंडशर्करादि उपपादितंउपाहृतं ३० ३४

एवंसनिश्चयंपापःकृत्वादुर्योधनस्तदा नित्यमेवांतरप्रेक्षीभीमस्यासीन्महात्मनः २६ ततोजविहारार्थंकारयामासभारत चैलकंवलेश्मानिविचित्राणिमहांतिच २७ सर्वकामैःसुपूर्णानिपताकोछ्रयवंतिच तत्रसंजनयामासनानागाराण्यनेकशः २८ उदकाक्रीडनंनामकारयामासभारत प्रमाणकोट्यांतंदेशंस्थलंकिंचिदुपेत्यह २९ भक्ष्यंभोज्यंचपेयंचचोष्यंलेह्यमथापिच उपपादितंनरैस्तत्रकुशलैःसूदकर्मणि ३० न्यवेदयंस्ततःपुरुषाधार्त्तराष्ट्रायवैतदा ततोदुर्योधनस्तत्रपांडवानाहदुर्मतिः ३१ गंगांचै[illegible]वानुयास्याम उद्यानवनशोभितां सहिताभ्रातरःसर्वे[illegible]जलक्रीडामवाप्नुमः ३२ एवमस्त्वितितंचापिप्रत्युवाचयुधिष्ठिरः ३२ तेरथैर्नगराकारैर्देशजैश्चगजोत्तमैः निर्ययुर्नगराछूराःकौरवाःपांडवैःसह उद्यानवनमासाद्यविसृज्यचमहाजनं विशंतिस्मतदावीराःसिंहाइवगिरेर्गुहां ३४ उद्यानमभिपश्यंतोभ्रातरःसर्वएवते उपस्थानगृहैःशुभ्रैर्वलभीभिश्चशोभि[illegible]तं गवाक्षकैस्तथाजालैर्यंत्रैःसांचारिकैरपि ३६ संमार्जितंसौधकारैश्चित्रकारैश्चचित्रितं दीर्घिकाभिस्तथापुष्करिणीभिः ३७ जलंतच्छुशुभेछन्नंफुल्लैर्जलरुहैस्तथा उपच्छन्नावसुमतीतथापुष्पैर्यथर्तुकैः ३८

श्चरत्नाभि २

उपस्थानगृहैःयत्रराजानंकार्यिणःआराध्योपतिष्ठंति[illegible]तैर्गृहैः वलभीभिः उभयतोनमत्पक्षाभिःस्तंभशालाभिः यंत्रैर्जलयंत्रैःशतधारादिभिःयतोएगपच्छंतथाराउच्छलंत्योनीहारीभूयमवनोदंस्यामुवंति सांचारिकैःसंचारयोग्यैः ३६ दीर्घिकाभिःकुल्याभिःपुष्करिणीभिर्हीतिउपात्यपालवैतेपिअनुशुभ्राहानेर्नरोषः ३७ उपछन्नासंछन्ना ३८

तत्रहेतुरजानतेति ४२ व्यायम्यपूर्वमंकृत्वा ४६ जलस्रोतमवसाने ४८

उपछन्नान्उपागत्वान्कामान्विषयान् ३९ ४१ प्रतीक्षितंप्रीत्यावेष्टितंभक्षितंनतद्गशत्रोरितिनिरस्तं ४२ ४७ आक्रमन्तस्मशरीरभारेणातानपीडितवान् ४९ ततस्ते

तत्रोपविष्टास्तेसर्वेपांडवाःकौरवाश्चह उपछन्नान्वहून्कामांस्तेभुंजतिततस्ततः ३९ अथोद्यानवरेतस्मिंस्तथाक्रीडागताश्चते परस्परस्य
वक्त्रेभ्योददुर्भक्ष्यांस्ततस्ततः ४० ततोदुर्योधनःपापस्तद्भक्ष्येकालकूटकं विषंप्रक्षेपयामासभीमसेनजिघांसया ४१ स्वयमुत्थायचैवाथ
हृदयेनक्षुरोपमः सवाचामृतकल्पश्चभ्रातृवच्चसुहृद्यथा स्वयंप्रक्षिपतेभक्ष्यंवहुभीमस्यपापकृत प्रतीक्षितंस्मभीमेनतंवैदोषमजानता ४२
ततोदुर्योधनस्तत्रहृदयेनहसन्निव कृतकृत्यमिवात्मानंमन्यतेपुरुषाधमः ४३ ततस्तेसहिताःसर्वेजलक्रीडामकुर्वतः पांड
वाधार्त्तराष्ट्राश्चतदामुदितमानसाः ४४ क्रीडावसानेतेसर्वेशुचिवस्त्राःस्वलंकृताः दिवसांतेपरिश्रान्ताविहृत्यचकुरूद्वहाः विहारावसथे
चैववीरवासमरोचयन् ४५ खिन्नस्तुवलवान्भीमोव्यायम्याभ्यधिकंतदा प्रमाणकोट्यांवासार्थीसुष्वापावाप्यतत्स्थलं ४६ शीतवातं
समासाद्यश्रांतोमदविमोहितः विषेणचपरीतांगोनिश्चेष्टःपांडुनंदनः ततोवद्ध्वालतापाशैर्भीमंदुर्योधनःस्वयं मृतकल्पंतदावीरंस्थला
ज्जलमपातयत् ४७ सनिःसंज्ञोजलस्यांतमथवैपांडवोविशत् आक्रमन्नागभवनेतदानागकुमारकान् ४९ ततःसमेत्यवहुभि
स्तदानागैर्महाविषैः अदृश्यतभृशंभीमोमहादंष्ट्रैर्विषोल्वणैः ५० ततोस्यदश्यमानस्यतद्विषंकालकूटकं हतंसर्पविषेणैव
स्थावरंजंगमेनतु ५१ दंष्ट्राश्चदंष्ट्रिणांतेषांमर्मस्वपिनिपातिताः त्वचंनैवास्यविभिदुःसारत्वात्पृथुवक्षसः ५२ ततःप्रवुद्धःकौ
तेयःसर्वसंछिद्यवंधनं पोथयामासतान्सर्वान्केचिद्भीताःप्रदुद्रुवुः ५३ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ॥

भीरिवन्नैत्रदश्यतदष्टः ५० ॥ ७ ॥ ७ ॥ ७ ॥

पंथ विषपीतः पीतविषः ५५ ५७ आर्यकेण नागराजेन पृथायाः ~~आर्यकेण~~ मातामहेन कुंतिभोजश्चायं संबंध इति गम्यते दौहित्रश्च इति तु आर्यकनाग दौहित्र इत्यर्थः
भीमः

आ०
२३४

हतावशेषा भीमेन सर्वे वासुकिमभ्ययुः ऊचुश्च सर्पराजानं वासुकिं वासवोपमं ५७ अयं नरो वै नागेंद्र ह्यप्सु बद्धा प्रवेशितः यथा च नो मतिर्वीर विषपीतो भविष्यति ५५ निश्चेष्टोस्मानतुप्राप्तः स च दष्टो न्वबुध्यत ससंज्ञश्चापि संवृत्तश्छित्वा बंधनमाशु नः ५६ पोथयतं महाबाहुं तं वै न शास्तुमर्हसि ततो वासुकिरभ्येत्य नागैरनुगतस्तदा पश्यति स्म महाबाहुं भीमं भीमपराक्रमं ५७ आर्यकेण च दृष्टः स पृथाया आर्यकेण च तदा दौहित्रदौहित्रः परिष्वक्तः सुपीडितः ५८ सुप्रीतश्चाभवत्तस्य वासुकिः स महायशाः अब्रवीत्तं च नागेंद्रः किमस्य क्रियतां प्रियं ५९ धनौघो रत्ननिचयो वसु चास्य प्रदीयतां एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत ६० यदि नागेंद्र तुष्टोसि किमस्य धनसंचयैः रसं पिबेत्कुमारोयं त्वयि प्रीते महाबलः ६१ बलं नागसहस्रस्य यस्मिन्कुंडे प्रतिष्ठितं यावत्पिबति बालोयं तावदस्मै प्रदीयतां ६२ एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः ६३ प्राङ्मुखश्चोपविष्टः सन् रसं पिबति पांडवः एकोच्छ्वासात्ततः कुंडं ~~पिबति~~ ~~स्म~~ कुंडं पिबति स्म महाबलः ६४ एवमष्टौ स कुंडानि ह्यपिबत्पांडुनंदनः ६५ ततस्तु शयने दिव्ये नागदत्ते महाभुजः अशेत भीमसेनस्तु यथासुखमरिंदमः इत्यादिपर्वणि संभवे वैशं ततस्ते कौरवाः सर्वे विना भीमं च पांडवाः वृत्तक्री~~डा~~डाविहारास्तु प्रतस्थुर्गजसाह्वयं १ रथैर्गजैस्तथा चाश्वैर्यानैश्चान्यैरनेकशः ब्रुवंतो भीमसेनस्तु यातो ह्यग्रत एव नः २
ततो दुर्योधनः पापस्तत्रापश्यन्वृकोदरं

दौहित्रो भीम इति आविरुद्धमेतत् अन्येत्वनूरस्मातामहस्यार्यकः ५८ ६८ नागदंते ~~[illegible]~~ भिन्निनोबहिर्निर्गतिदारु हरीयत आसनस्थानं तत्र स्मरोखा
इतिभाषया प्रसिद्धः ६५ अध्यायः ततस्ते वृत्तः समाप्तः ६१ ३

एम०
२३४

हेऽस्य च पट भावः चित्तं न शुध्यते जीवतीति न मनुते ९ १३ नचेति दुर्योधनस्ते दृष्टुं न शक्नोतीत्यर्थः १४ १५ वत्स्य विपरीतं मन्ये यान्प्रत्यादिष्टः कुन्तो भीमं हृतवानमी

भ्रातृभिः सहितो हृष्टो नगरं प्रविवेश ह ३ युधिष्ठिरस्तु धर्मात्मा ह्यविदित्वा पापमात्मनि स्वेनानुमानेन परं साधुं समनुपश्यति ४ सोऽभ्युपेत्य तदा पा
र्थो मातरं भ्रातृवत्सलः अभिवाद्याब्रवीत्कुंतीमंब भीम इहागतः ५ क्व गतो भविता मातर्नेह पश्यामि तं शुभे उद्यानानि वनं चैव विचितानि
वनं चैव विचितानि समंततः ६ तदर्थं न च तं वीरं दृष्टवंतो वृकोदरं मन्यमानास्ततः सर्वे यातो नः पूर्वमेव सः ७ आगताः स्म मह
भागे व्याकुलेनांतरात्मना इहागम्य क्व नु गतस्त्वया वा प्रेषितः क्व नु ८ कथयस्व महाबाहुं भीमसेनं यशस्विनि नहि मे शुध्यते भावस्तं
वीरं प्रति शोभने ९ इत्युक्ता च ततः कुंती धर्मराजेन धीमता हाहेति कृत्वा संभ्रांता प्रत्युवाच युधिष्ठिरं १० न पुत्र भीमं पश्यामि न मा
मभ्येत्य सावितिः शीघ्रमन्वेषणे यत्नं कुरुत स्यानुजैः सह ११ इत्युक्त्वा तनयं ज्येष्ठं हृदयेन विदूयता क्षत्तारमानाय्य तदा कुंती वचनमब्रवी
त् १२ क्व गतो भगवन् क्षत्तर्भीमसेनो न दृश्यते उद्यानान्निर्गताः सर्वे भ्रातरो भ्रातृभिः सह १३ तत्रैकस्तु महाबाहुर्भीमो नाभ्येति मा
मिह न च प्रीणयते चक्षुः सदा दुर्योधनस्य सः १४ क्रूरोऽसौ दुर्मतिः क्षुद्रो राज्यलुब्धोऽनपत्रपः निहन्यादपि तं वीरं जातमन्युः सुयोधनः १५
तेन मे व्याकुलं चित्तं हृदयं दह्यतीव च विदुर उवाच मैवं वदस्व कल्याणि शेषसंरक्षणं कुरु प्रत्यादिष्टो हि दुष्टात्मा शेषेऽपि प्रहरेत्तदा १६
दीर्घायुषस्तव सुता यथोवाच महामुनिः आगमिष्यति ते पुत्रः प्रीतिं चोत्पादयिष्यति १७ वैशंपायन उवाच एवमुक्त्वा ययौ विद्वा
न्विदुरः स्वं निवेशनं कुंती चिंतापरा भूत्वा सहासीना सुतैर्गृहे १८ ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पांडवः तस्मिंस्तदा रसे जीर्णे सोऽप्र
मेयबलो बली १९

त्युपालम्भः १६ ॥ ७ ॥ ७ ॥ ७॥

आ०
२३५

३४ तान्कुरुबालकान्न्यवेदयत ३५ अध्यायः गुरुद्वारकमपि कौरवाणां माहात्म्यं वक्तुं गुर्वोः कृपद्रोणयोरुत्पत्तिं विशिष्य माहाध्यायाभ्यां कृपस्यापीत्यादिना १

अ०१२७

तं दृष्ट्वा प्रतिबुध्यंतं पांडवं ते भुजंगमाः सांत्वयामासुरव्यग्रा वचनं चेदमब्रुवन २० यत्ते पीतो महाबाहो रसोऽयं वीर्यसंमतः तस्मान्नागायुतबलो
रणेऽधृष्यो भविष्यति २१ गच्छाद्य त्वं च स्वगृहे स्नातो दिव्यैरिमैर्जलैः भ्रातरस्तेऽनुतप्यंति त्वां विना कुरुपुंगव २२ ततः स्नातो महाबाहुः शुचिः
शुक्लांबरस्रजः ततो नागस्य भवने कृतकौतुकमंगलः २३ ओषधीभिर्विषघ्नीभिः सुरभाभिर्विशेषतः भुक्तवान्परमान्नं च नागै
र्दत्तं महाबलः २४ पूजितो भुजगैर्वीर आशीर्भिश्चाभिनंदितः दिव्याभरणसंछन्नो नागानामत्र पांडवः २५ उदतिष्ठत्प्रहृष्टात्मा नाग
लोकादरिंदमः उत्क्षिप्तः स तु नागेन जलाज्जलरुहेक्षणः २६ तस्मिन्नेव वनोद्देशे स्थापितः कुरुनंदनः तेवांतर्दधिरे नागाः पांडवस्यैव पश्यतः
२७ तत उत्थाय कौंतेयो भीमसेनो महाबलः आजगाम महाबाहुर्मातुरंतिकमंजसा २८ ततोऽभिवाद्य जननीं ज्येष्ठं भ्रातरमेव सः
कनीयसः समाघ्राय शिरःस्वरिविमर्दनः २९ तैश्चापि संपरिष्वक्तः सह मात्रा नरर्षभैः अन्योन्यगतसौहार्दाद्दिष्ट्या दिष्ट्येति चाब्रुव
न ३० ततस्तत्सर्वमाचष्ट दुर्योधनविचेष्टितं भ्रातॄणां भीमसेनश्च महाबलपराक्रमः नागलोके च यद्वृत्तं गुणदोषमशेषतः त
च्च सर्वमशेषेण कथयामास पांडवः ३२ ततो युधिष्ठिरो राजा भीममाह वचोऽर्थवत तूष्णीं भव न ते जल्प्यमिदं कार्यं कथंचन ३३ इ
तः प्रभृति कौंतेया रक्षतान्योन्यमादृताः एवमुक्त्वा महाबाहुर्धर्मराजो युधिष्ठिरः भ्रातृभिः सहितः सर्वैरप्रमत्तोऽभवत्तदा ३४ कु
मारान्क्रीडमानांस्तान्दृष्ट्वा राजातिदुर्मदान गुरुं शिक्षार्थमन्विष्य गौतमं तान्न्यवेदयत शरस्तंबे समुद्भूतं वेदशास्त्रार्थपारगं ३५
इत्यादिपर्वणि संभवे जनमेजय उवाच कृपस्यापि मम ब्रह्मन्संभवं वक्तुमर्हसि शरस्तंबात्कथं जज्ञे कथं चास्त्राण्यवाप्तवान १

एम०
२३५

शरद्वान्नामतः गौतमो गौत्र तं शरैः सहजातः शरा एव वास्य बंधुवत्प्रियाइत्यर्थः २ तदेवाह नतस्येति ३।४ समर्थनात सामर्थ्यात समन्वयादिति पाठांतरं १०

गौतमः १

वैशंपायन उवाच महर्षेर्गौतमस्यासीच्छरद्वान्नाम नामतः पुत्रः किल महाराज जातः सह शरैर्विभो ३ नतस्य वेदाध्ययने तथा बुद्धिरजायत यथास्य बुद्धिरभवद्धनुर्वेदे परंतप अधिजग्मुर्यथा वेदांस्तपसा ब्रह्मचारिणः तथा स तपसोपेतः सर्वाण्यस्त्राण्यवाप ह ४ धनुर्वेदपरत्वाच्च तपसा विपुलेन च भृशं संतापयामास देवराजं स गौतमः ५ ततो जानपदीं नाम देवकन्यां सुरेश्वरः प्राहिणोत्तपसो विघ्नं कुरु तस्येति कौरव ६ सा हि गत्वाश्रमं तस्य रमणीयं शरद्वतः धनुर्बाणधरं बाला लोभयामास गौतमं ७ तामेकवसनां दृष्ट्वा गौतमोऽप्सरसं वने लोकेऽप्रतिमसंस्थानां प्रोत्फुल्लनयनोऽभवत ८ धनुश्च हि शराश्चास्य कराभ्यामपतन्भुवि वेपथुश्चापि तां दृष्ट्वा शरीरे समजायत ९ स तु ज्ञानगरीयस्त्वात्तपसश्च समर्थनात अवतस्थे महाप्राज्ञो धैर्येण परमेण ह १० यस्तस्य सहसा राजन्विकारः समदृश्यत तेन सुस्राव रेतोऽस्य स च तन्नावबुध्यत ११ स विहायाश्रमं तं च तां चैवाप्सरसं मुनिः जगाम रेतस्तत्तस्य शरस्तंबे प[१] पपात तं वै च पतितं द्विधा तदभवन्नृप तस्याथ मिथुनं जज्ञे गौतमस्य शरद्वतः १३ मृगयां चरतो राज्ञः शंतनोस्तु यदृच्छया कश्चित्सेनाचरोऽरण्ये मिथुनं [illegible] तदपश्यत १४ धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च ज्ञात्वा द्विजस्यापत्ये ते धनुर्वेदान्तगस्य ह १५ स राज्ञो दर्शयामास मिथुनं सशरं धनु स तदाय मिथुनं राजा च कृपयान्वितः १६ आजगाम गृहानेव मम पुत्राविति ब्रुवन ततः संवर्द्धयामास संस्कारैश्चाप्ययोजयत १७

च शरस्तं ४

११ १२ १३ १४ १५ १६ १७ ॥ ७ ॥ ७॥ ७॥ पुत्रीच पुत्रश्च पुत्रौ १७

प्रातिपेयः प्रतीपपुत्रः १८ १९ गोपितौ रक्षायाविति २० चतुर्विधं मुक्तममुक्तं मुक्तामुक्तं मंत्रमुक्तं चेति मुक्तं बाणादि अमुक्तं खड्गादि मुक्तामुक्तं सोपसंहारं अ

आ०
२३६

प्रातिपेयो नरश्रेष्ठो मिथुनं गौतमस्य तत् गौतमोपि ततोभ्येत्य धनुर्वेदपरोभवत् १८ कृपया यन्मया बालाविमौ संवर्द्धिताविति तस्मात्तयोर्नाम चक्रे तदेव स महीपतिः १९ गोपितौ गौतमस्तत्र तपसा समविंदत आगम्य तस्मै गोत्रादि सर्वमाख्यातवांस्तदा २० चतुर्विधं धनुर्वेदं शास्त्राणि विविधानि च निखिलेनास्य तत्सर्वं गुह्यमाख्यातवांस्तदा २१ सोचिरेणैव कालेन परमाचार्यतां गतः ततोधिजग्मुः सर्वे ते धनुर्वेदं महारथाः २२ धृतराष्ट्रात्मजाश्चैव पांडवाः सह यादवैः वृष्णयश्च नृपाश्चान्ये नानादेशसमागताः २३ इत्यादिपर्वणि संभवे वैशंपायन उवाच विशेषार्थी ततो भीष्मः पौत्राणां विनयेप्सया इष्वस्त्रज्ञान्पर्यपृच्छदाचार्यान्वीर्यसम्मतान् १ नाल्पधीर्नामहाभागस्तथानानस्त्रकोविदः नादेवसत्वो विनयेत्कुरूनस्त्रे महाबलान् २ इति संचिंत्य गांगेयस्तदा भरतसत्तम द्रोणाय वेदविदुषे भारद्वाजाय धीमते ३ पांडवान्कौरवांश्चैव ददौ शिष्यान्नरर्षभ शास्त्रतः पूजितश्चैव सम्यक्तेन महात्मना सभीष्मेण महाभागस्तुष्टोस्त्रविदुषां वरः प्रतिजग्राह तान्सर्वाञ्छिष्यत्वेन महायशाः ४ शिक्षयामास च द्रोणो धनुर्वेदमशेषतः तेचिरेणैव कालेन सर्वशस्त्रविशारदाः बभूवुः कौरवा राजन्पांडवाश्चामितौजसः ५ ॥ ७ ॥ ७ ॥

स्त्रं निरुपसंहारमस्त्रं मंत्रमुक्तं षड्याशस्त्रं अस्त्रं प्रत्यस्त्रं परमास्त्रं च ^ २१ अध्यायः ३ विशेषार्थी १ अदेवसत्वः नास्ति देवस्येव सत्वं सामर्थ्यं यस्य स २३ ४ ५ ॥
च १ यद्वा आदानसंधानविमोक्षसंहाराश्च १

टम०
२३६

(c) Dharmarth Trust. Digitized By eGangotri

७ स१ तितः पूर्वमिवाप्लुतामिति संबंधः अंगलग्नवस्त्राविवृतांगां ददर्शेति भावः ८ ९ द्रोणो द्रोणाकलशाख्ये यत्रियपात्रविशेषे १० यतो द्रोणाकलशे भवत्ततो द्रोण इति नामनिर्वक्तितत इति १ अग्नीति भरद्वाज अग्नेयमस्त्रं अग्निवेशाय ददौ स चाग्नेः पुत्रः अग्निवेशो भारद्वाजं द्रोणां स्वगुरुपुत्रं आग्नेयमस्त्रमशिक्षयदिति

जनमेजय उवाच कथं द्रोणः समभवत्कथमस्त्राण्यवाप्तवान् कथं चागात्कुरून्ब्रह्मन्कस्य पुत्रः स वीर्यवान् कथं चास्य सुतो जातस्त्वश्वत्थामास्त्रवित्तथा एतदिच्छाम्यहं श्रोतुं विस्तरेणानुकीर्तय वैशंपायन उवाच गंगाद्वारं प्रति महान्बभूव भगवानृषिः भरद्वाज इति ख्यातः सततं शंसितव्रतः ७ सोभिषेक्तुं ततो गंगां पूर्वमेवागमन्नदीं महर्षिस्तु भरद्वाजो हविर्धाने चरन्पुरा ददर्शाप्सरसं साक्षाद्घृताचीमाप्लुतामृषिः रूपयौवनसंपन्नां मदधृष्टां मदालसां ८ तस्याः पुनर्नदीतीरे वसनं पर्यवर्त्तत व्यपकृष्टांबरां दृष्ट्वा तामृषिश्चकमे ततः ९ तत्र संसक्तमनसो भरद्वाजस्य धीमतः ततोस्य रेतश्चस्कंद तदृषिर्द्रोण आदधे १० ततः समभवद्द्रोणः कलशे तस्य धीमतः अध्यगीष्ट स वेदांश्च वेदांगानि च सर्वशः ११ अग्निवेशं महाभागं भरद्वाजः प्रतापवान् प्रत्यपादयदाग्नेयमस्त्रं विदांवरः अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत् १५ भरद्वाजसखा चासीत्पृषतो नाम पार्थिवः तस्यापि द्रुपदो नाम तदा समभवत्सुतः पांचालेषु महाबाहुः क्षत्रियेषु नरेश्वरः १६ भरद्वाजोपि भगवानारुरोह दिवं तदा तत्रैव च वसन्द्रोणस्तपस्तेपे महातपाः १७ वेदवेदांगविद्वान्स तपसा दग्धकिल्बिषः ततः पितृनियुक्तात्मा पुत्रलोभान्महायशाः १८ शारद्वतीं ततो भार्यां कृपीं द्रोणोन्वविंदत अग्निहोत्रे च धर्मे च दमे च सततं रता १९ अलभद्गौतमी पुत्रमश्वत्थामानमेव च स जातमात्रो व्यनदद्यथैवोच्चैःश्रवा हयः २० तच्छ्रुत्वांतर्हितं भूतमंतरिक्षस्थमब्रवीत् अश्वस्येवास्य यत्स्थाम नदतः प्रदिशो गतं अश्वत्थामैव बालोयं तस्मान्नाम्ना भविष्यति २१

मस्त्र

श्लोकद्वयार्थः १३ १७ पितृभिः पुत्रमुत्पादयेति नियुक्त आत्मा मनो यस्य स पितृनियुक्तात्मा १९ २० स्थामशब्दः सकारस्य तकारादेशो श्वत्थामेति २१ ॥

सुतेनतेनसुप्रीतोभारद्वाजस्ततोभवत् २२ तत्रैवचवसन्धीमान्धनुर्वेदपरोभवत् सशुश्राव महात्मानंजामदग्न्यंपरंतपं २३ सर्वज्ञानविदं
विप्रंसर्वशस्त्रभृतांवरं २४ ब्राह्मणेभ्यस्तदाराजन्दित्सन्तंवसुसर्वशः सरामस्यधनुर्वेदंदिव्यान्यस्त्राणिचैवहि श्रुत्वातेषुमनश्चक्रे
नीतिशास्त्रेतथैवच २५ ततःसव्रतिभिःशिष्यैस्तपोयुक्तैर्महातपाः वृतःप्रायान्महाबाहुर्महेन्द्रंपर्वतोत्तमं २६ ततोमहेन्द्रमासा
द्यभारद्वाजोमहातपाः (वृतःप्रायान्महाबाहुर्महेन्द्रंपर्वतोत्तमं २६ ततोमहेन्द्रमासाद्यभारद्वाजोमहातपाः) क्षान्तंदान्तममित्रघ्न
मपश्यद्भृगुनंदनं २७ ततोद्रोणोवृतःशिष्यैरुपगम्यभृगूद्वहं आचख्यावात्मनोनामजन्मचांगिरसःकुले २८ निवेद्यशिरसाभू
मौपादौचैवाभ्यवादयत् ततस्तंसर्वमुत्सृज्यवनंजिगमिषुंतदा जामदग्न्यंमहात्मानंभारद्वाजोब्रवीदिदं २९ भरद्वाजात्स
मुत्पन्नंतथात्वंमामयोनिजं आगतंवित्तकामंचविद्धिद्रोणंद्विजोत्तम ३० तमब्रवीन्महात्मानंसर्वक्षत्रियमर्दनः स्वागतंते
द्विजश्रेष्ठयदिच्छसिवदस्वमे ३१ एवमुक्तस्तुरामेणभारद्वाजोब्रवीद्वचः रामंप्रहरतांश्रेष्ठंदित्सन्तंविविधंवसु ३२ अहंध
नमनन्तंहिप्रार्थयेविपुलव्रत ३३ रामउवाच हिरण्यंममयच्चान्यद्वसुकिंचिदिहस्थितं ब्राह्मणेभ्योमयादत्तंसर्वमेतत्तपो
धन ३४ तथेवेयंधरादेवीसागरान्तासपत्तना कश्यपायमयादत्ताकृत्स्नानगरमालिनी ३५ शरीरमात्रमेवाद्यममेदमव
शेषितं अस्त्राणिचमहार्हाणिशस्त्राणिविविधानिच ३६ अस्त्राणिवाशरीरंवावरमेतन्मयोद्यतं वृणीष्वकिंप्रय
च्छामितुभ्यंद्रोणवदाशुतत् ३७ द्रोण अस्त्राणिमेसमग्राणिससंहाराणिभार्गव सप्रयोगरहस्यानिदातुमर्हस्यशे
षतः ३८ तथेत्युक्त्वाततस्तस्मैप्रादादस्त्राणिभार्गवः सरहस्यव्रतंचैवधनुर्वेदमशेषतः प्रतिगृह्यतुतत्सर्वंकृतास्त्रोद्विज
सत्तमः प्रियंसखायंसुप्रीतोजगामद्रुपदंप्रति ४० इत्यादिसंभवे

मे ५

ततोद्रु २ कषायीकृतेरक्तेलोचनेयस्यसः अकृताअसंस्कृता ४ ५ सामर्थ्यंतपनेनासमर्थस्यसौहृदंजीर्यतइत्युक्तं ६ एनंसख्यायंविहरतिपृथक्करोतिहरतिसख्यात्स्याव
यति ७ एवंजीर्णंभवतजीर्णत्वंप्राप्नुवतसख्यंमाउपास्स्वत्वपुनःअपाकृधिदूरीकुरु ८ पूर्वंसखाइतिसखिपूर्वंसख्यंकिंइष्यतेअपितुनेत्यर्थः।विपुष्टःकृशोनिर्धनो

वैशंपायनउवाच ततोद्रुपदमासाद्य भारद्वाजःप्रतापवान् अब्रवीत्पार्थिवंराजन् सखायंविद्धिमामिति १ इत्येवमुक्तःसख्या
सप्रीतिपूर्वंजनेश्वरः भारद्वाजेनपांचाल्योनामृष्यतवचोस्य तत् २ सक्रोधामर्षजिह्मभ्रूःकषायीकृतलोचनः ऐश्वर्यमदसंप
न्नोद्रोणंराजाब्रवीदिदं ३ द्रुपदउवाच अकृतेयंतवप्रज्ञा ब्रह्मन्नातिसमंजसी यन्माब्रवीषिप्रसभंसखातेहमितिद्विज
नहिराज्ञामुदीर्णानामेवंभूतैर्नरैःक्वचित सख्यंभवतिमंदात्मन्श्रियाहीनैर्धनच्युतैः ५ सौहृदान्यपिजीर्यंतेकालेनपरिजीर्यतः
सौहृदंमेत्वयाह्यासीत्पूर्वंसामर्थ्यबंधनं ६ नसख्यमजरंलोकेहृदितिष्ठतिकस्यचित कालोह्येनंविहरतिक्रोधोवैनंहरत्युत ७
मैवंजीर्णमुपास्स्वत्वंसख्यंभवदुपाकृधि आसीत्सख्यंद्विजश्रेष्ठत्वयामेर्थनिबंधनं ८ नदरिद्रोवसुमतोनाविद्वान्नविदुषःसखा
नशूरस्यसखाक्लीबःसखिपूर्वंकिमिष्यते ९ ययोरेवसमंवित्तंययोरेवसमंश्रुतं तयोर्विवाहःसख्यंचनतुपुष्टपुष्टयोः १० नाश्रो पुष्टवि
त्रियःश्रोत्रियस्यनारथीरथिनःसखा नराजापार्थिवस्यापिसखिपूर्वंकिमिष्यते ११ वैशंपायनउवाच द्रुपदेनैवमुक्तः भारद्वाजःप्रताप स्तु
वान् मुहूर्तंचिंतयित्वातुमन्युनाभिपरिप्लुतः १२ सविनिश्चित्यमनसापांचालंप्रतिबुद्धिमान् जगामकुरुमुख्यानांनगरंनाग
साह्वयं १३ सनागपुरमागम्यगौतमस्यनिवेशने भारद्वाजोवसत्तत्रप्रछन्नंद्विजसत्तमः १४ ॥ छ ॥ छ ॥
श्रोत्रिय ३

वा १० द्रुपदेनेतिपांचाल्यंगर्वितंचिंतयित्वातत्पराभवोपायंमनसाविनिश्चित्यप्रतिबुद्धिःप्रतीपबुद्धिःशत्रुबुद्धिःतद्धानसनतुनागसाह्वयंजगामेतिद्वयोःसंबंधः १२ १३
१४

अस्यतनुजोऽश्वत्थामानाम्नुयुधंतेद्रोणपुत्रोयमितिनज्ञातवंतं १५ १६ वीटयायचकारेणप्रादेशमात्रकाष्ठेनयतस्तत्तमात्रदंडेनेउपर्युपरि कुमाराः परिक्षिपंति जो ह्युलि

आ०
२३८

ततोस्यतनुजःपार्थान्कृपस्यानंतरंप्रभुः अस्त्राणिशिक्षयामासनान्वबुध्यंतचतंजनाः १५ एवंसतत्रगूढात्मा कंचित्कालमुवासह कुमारा
स्त्वथनिष्क्रम्यसमेतागजसाह्वयात् १६ क्रीडंतोवीटयातत्रवीराःपर्यचरन्मुदा पपातकूपेसावीटातेषांवैक्रीडतांतदा १७ ततस्तेयत्नमा
तिष्ठन्वीटामुद्धर्तुमादृताः नचतेप्रत्यपद्यंतकर्मवीटोपलब्धये १८ ततोन्योन्यमवैक्षंतव्रीडयावनताननाः तस्यायोगमविंदंतोभृशं
चोत्कंठिताभवन् १९ तेपश्यन्ब्राह्मणंश्याममापन्नंपलितंकृशं कृत्यवंतमदूरस्थमग्निहोत्रपुरस्कृतं २० तेतंदृष्ट्वामहात्मा
नमुपगम्यकुमारकाः भग्नोत्साहक्रियात्मानोब्राह्मणंपर्यवारयन् २१ अथद्रोणःकुमारांस्तान्दृष्ट्वाकृत्यवतस्तदा प्रहस्यकर्मपैशल्यादवे
भ्यभाषतवीर्यवान् २२ अहोवोधिग्बलंक्षात्रंधिगेतांवःकृतास्त्रतां भरतस्यान्वयेजातायेवीटांनाधिगच्छत २३ वीटांचमुद्रिकांचैवह

१७६

हमेतदपिवोद्वयं उद्धरेयमिषीकाभिर्भोजनंमेप्रदीयतां २४ एवमुक्त्वाकुमारास्तांद्रोणःस्वांगुलिवेष्टनं कूपेनिरुदकेतस्मिन्नपातयदरिं
दमः ततोब्रवीत्तदाद्रोणंकुंतीपुत्रोयुधिष्ठिरः २५ युधिष्ठिरउवाच कृपस्यानुमतेब्रह्मन्भिक्षामाप्नुहिशाश्वतीं एवमुक्तःप्रत्युवाच
प्रहस्यभरतानिदं २६ द्रोणउवाच एषामुष्टिरिषीकाणांमयास्त्रेणाभिमंत्रिता अस्यावीर्यंनिरीक्षध्वंयदन्यस्यनविद्यते २७ भे
त्स्याम्यिषीकयावीटांतामिषीकांतथान्यया तामन्ययासमायोगोवीटायाग्रहणंमम २८ वैशंपायनउवाच ततोयथोक्तंद्रोणेन
तत्सर्वंकृतमंजसा तदवेक्ष्यकुमारास्तेविस्मयोत्फुल्ललोचनाः २९ आश्चर्यमिदमत्यंतमितिमत्वावचोब्रुवन् कुमारऊचुः
मुद्रिकामपिविप्रर्षेशीघ्रमेतांसमुद्धर ३० वैशंपायनउवाच ततःशरंसमादायधनुर्द्रोणोमहायशाः शरेणविध्वामुद्रांतामूर्ध्वमा
वाहयत्प्रभुः सशरंसमुपादायकूपात्स्वांगुलिवेष्टनं ददौततःकुमाराणांविस्मितानामविस्मितः मुद्रिकामुद्धृतांदृष्ट्वातमाहुस्तेकुमारकाः ३२

एम०
२३८

कपेत्यस्य १७ २१ पैशल्यात कौशल्यात २२ २३ मुद्रिकांचमयात्पञ्यमानां ३२ ॥ ७ ॥ ७ ॥

३४ सांप्रतंयुक्तंप्रतिपत्स्यतेहास्यति ३५ ३६ विकीर्षयाजिज्ञासयापाण्डुविज्ञानेइत्यस्यरूपं ४ ४२ सखावयस्यःउपकारकर्तृत्वादेवप्रियोवल्लभस्त्ववर्त्तेपतवसत ४३

कुमाराऊचुः अभिवादयामहेब्रह्मन्नैतदन्येषुविद्यते कोसिकंत्वांविजानीमोवयंकिंकरवामहे ३३ वैशंपायनउवाच एवमुक्तस्ततोद्रोणः
प्रत्युवाचकुमारकान् ३४ द्रोणउवाच आचक्षध्वंचभीष्मायरूपेणचगुणैश्चमां सएवसुमहातेजाःसांप्रतंप्रतिपत्स्यते ३५ वैशंपायन
उवाच तथेत्युक्त्वाचगत्वाच [illegible] भीष्ममूचुःकुमारकाः ब्राह्मणस्यवचस्तथ्यंतच्चकर्मतथाविधं ३६ भीष्मःश्रुत्वाकुमाराणांद्रोणंतं
प्रत्यजानत युक्तरूपःसहिगुरुरित्येवमनुचिंत्यच ३७ अथैनमानीयतदास्वयमेवसुसत्कृतं परिपप्रच्छनिपुणंभीष्मःशस्त्रभृतांवरः ३८
हेतुमा[illegible]गनेतच्चद्रोणःसर्वं[illegible]न्यवेदयत द्रोणउवाच महर्षेरग्निवेश[illegible]स्यसकाशमहमच्युत अस्त्रार्थमगमंपूर्वंधनुर्वेदचिकीर्ष
या ४० ब्रह्मचारीविनीतात्माजटिलोबहुलाःसमाः अवसंसुचिरंतत्रगुरुशुश्रूषणेरतः ४१ पांचाल्योराजपुत्रश्चयज्ञसेनोमहाबलः इष्वस्त्र
हेतोन्यवसंतस्मिन्नेवगुरौप्रभुः ४२ समेतत्रसखाचासीदुपकारीप्रियश्चमे तेनाहंसहसंगम्यवर्त्तयन्सुचिरंप्रभो ४३ बाल्यात्प्रभृतिकौर
व्यसहाध्ययनमेवच समेसखासदातत्रप्रियवादीप्रियंकरः ४४ अब्रवीदितिमांभीष्मवचनंप्रीतिवर्द्धनं अहंप्रियतमःपुत्रःपितुर्द्रो
णमहात्मनः ४५ अभिषेक्ष्यतिमांराज्येसपांचाल्योयदातदा त्वद्भोग्यंभवितातातसखेसत्येनतेशपे ४६ ममभोगाश्चवित्तंचत्वद
धीनंसुखानिच एवमुक्तोथवव्राजकृतास्त्रःपूजितोमया ४७ तच्चवाक्यमहंनित्यंमनसाधारयंस्तदा सोहंपितृनियोगेनपुत्रलोभा
द्यशस्विनीं ४८ नातिकेशीमहाप्राज्ञामुपयेमेमहाव्रतां अग्निहोत्रेचसत्रेचदमेचसततंरतां ४९ ॥ ७॥ ७ ॥ ७॥

४४ ४५ ४६ ४७ ४८ ४९ ॥ ७॥

५० दिशः संदेहयत दिशो रुमजनयत अडभाव आर्षः शत्रं तदा ५१ स्नातः कोयः कश्चिद् दुःस्थगो धनः स्वधर्मलोपान्नावसीदेत अतो वहुगोधनवतो ब्राह्मणस्य प्रतिग्रहमिच्छन् ५२ अंतादंतं देशाद्देशः ५३ ५७ संभाषतां संभाषमाणानां अच्यवत धर्मच्युतोऽभूत् । आत्मानं दरिद्रदोषाद्धनाभावात् मनसा गर्हन् इदं वक्ष्यमाणं ५८

अलभत्सोतमीपुत्रमश्वत्थामानमौरसं भीमविक्रमकर्माणमादित्यसमतेजसं ५० पुत्रेण तेन प्रीतोऽहं भरद्वाजो मयायथा गोक्षीरं पिबतो दृष्ट्वा धनिनस्तत्र पुत्रकान् अश्वत्थामारुदद्बालस्तन्मे संदेहयद्दिशः नस्नातको वसीदेत वर्तमानः स्वकर्मसु इति संचिंत्य मनसा तं देशं वहु चिं शो भ्रमन् ५२ विशुद्धमिच्छन् गांगेय धर्मोपेतं प्रतिग्रहं अंताद्देशं परिक्रम्य नाध्यगच्छं पयस्विनीं ५३ अथ पिष्टोदकेनैव लोभयंति कुमारकं पीत्वा पिष्टरसं बालः क्षीरं पीतं मयापि च ५४ ननर्तोत्थाय कौरव्य हृष्टो बाल्याद्विमोहितः तं दृष्ट्वा नृत्यमानं तु बालैः परिवृतं सुतं ५५ हास्यतामुपसंप्राप्तं कश्मलं तत्र मेऽभवत् द्रोणं धिगस्त्वधनिनं यो धनं नाधिगच्छति ५६ पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया नृत्यति स्म मुदाविष्टः क्षीरं पीतं मयाप्युत ५७ इति संभाषतां वाचं श्रुत्वा मे बुद्धिरच्यवत आत्मानं चात्मना गर्हन् मनसेदं विचिंतयं ५८ अपि चाहं पुरा विप्रैर्वर्जितो गर्हितो वसे परोपसेवां पापिष्ठां न च कुर्यां धनेप्सया ५९ इति मत्वा प्रियं पुत्रं भीष्मादाय ततो ह्यहं पूर्वस्नेहानुरागित्वात्सदारः सोमकिं गतः ६० अभिषिक्तं तु श्रुत्वैनं कृतार्थोऽस्मीति चिंतयन् प्रियं सखायं [illegible] सुप्रीतो राज्यस्थं समुपागमं संस्मरन् संगमं चैव वचनं चैव तस्य तत् ६१ [illegible] ततो द्रुपदमागम्य सखिपूर्वं महं प्रभो अब्रुवं पुरुषव्याघ्र सखायं विद्धि मामिति ६२ उपस्थितस्तु द्रुपदं सखिवच्चास्मि संगतः स मां निराकारमिव प्रहसन्निदमब्रवीत् ६३

वं २

पुरा पूर्वं दरिद्रो यामि ति गर्हितो पि वसे उपवासं कुर्वन्नत्र सेवां कुर्याम् इति मत्वा निश्चित्य अपि पुत्रस्य प्रियत्वात् सोमकिं द्रुपदं गत इति संबंधः ६० ततस्तस्य वचनं मम राज्यं त्वद्भोग्यं भविष्यतीति ६१ ६२ निराकारं स्तोकमल्पं हीनजनमिव ६३ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ वं ७ ॥

निर०

कुरुक्षये १

अहं तेयमिविप्राग्वाख्यातं ७१ राज्यार्थेसंविदंत्वह्लोग्यंममराज्यमितिसंकेतं ७२ ७७ प्रतिपाद्यत्रस्मत्कुमारेभ्यश्तिशेषैःकुरुगृहे ७८ ७९ ८० अध्यायः ॥ ॥

वं २

अहतेयंतवप्रज्ञाबालिशानातिसमंजसी यन्मांब्रवीषिप्रसभंसखातेहमितिद्विज ६४ संगतानीहजीर्यंतिकालेनपरिजीर्यतः सौ
हृदंमेत्वयाह्यासीत्पूर्वंसामर्थ्यबंधनं ६५ नाश्रोत्रियःश्रोत्रियस्यनारथीरथिनःसखा साम्याद्धिसख्यंभवतिवैषम्यान्नोपपद्यते ६६
नसख्यमजरंलोकेविद्यतेजातुकस्यचित् लोकोवैनंविहरतिक्रोधोवैनंहरत्युत ६७ मैवंजीर्णमुपास्वत्वंसख्यंभवदुपाकृधि आ
सीत्सख्यंद्विजश्रेष्ठत्वयामेर्थनिबंधनं ६८ नह्यनाढ्यःसखाढ्यस्यनाविद्वानविदुषःसखा नशूरस्यसखाक्लीबःसखिपूर्वंकिमि
ष्यते ६९ नहिराज्ञामुदीर्णानामेवंभूतैर्नरैःक्वचित् सख्यंभवतिमंदात्मनश्रियाहीनैर्धनच्युतैः ७० नाश्रोत्रियःश्रोत्रिय
स्यानारथीरथिनःसखा नाराजापार्थिवस्यापिसखिपूर्वंकिमिष्यते ७१ अहंत्वयानजानामिराज्यार्थेसंविदंकृतं एकरात्रंतुतेब्रह्म
न्कामंदास्यामिभोजनं ७२ एवमुक्तस्त्वहंतेनसदारःप्रस्थितस्तदा तांप्रतिज्ञांप्रतिज्ञाययांकर्तास्म्यचिरादिव ७३ द्रुपदेनैवमु
क्तोहंमन्युनाभिपरिप्लुतः अभ्यागच्छंकुरून्भीष्मशिष्यैरर्थीगुणान्वितैः ७५ ततोहंभवतःकामंसंवर्द्धयितुमागतः इदंनागपुरं
रम्यंब्रूहिकिंकरवाणिते ७६ वैशंपायनउवाच एवमुक्तस्तदाभीष्मोभारद्वाजमभाषत ७७ भीष्मउवाच अपज्यंक्रियतां
चापंसाध्वस्त्रंप्रतिपादय भुंक्ष्वभोगान्भृशंप्रीतःपूज्यमानःकुरुक्षये ७८ कुरूणामस्तियद्वित्तंराज्यंचेदंसराष्ट्रकं त्वमेवपरमोरा
जासर्वेचकुरवस्तव ७९ यच्चतेप्रार्थितंब्रह्मनकृतंतदितिचिंत्यतां दिष्ट्याप्राप्तोसिविप्रर्षेमहान्मेनुग्रहःकृतः ८० ॥ ७ ॥

ततःस २ सुपरिछन्नंसुधाधालिप्तं ३ ४ प्रतीतात्माहृष्टचित्तः कृतोपसदनान कृतपादग्रहणान ५ १२ धनुर्वेदस्यचिकीर्षया जिज्ञासयाशिक्षाभिः पांडवोद्रोणं अ

आ०
२५०

वैशंपायनउवाच ततःसंपूजितोद्रोणोभीष्मेणाद्विपदांवरः विशश्राममहातेजाःपूजितःकुरुवेश्मनि १ विश्रांतेथगुरौतस्मिन
पौत्रानादायकौरवान शिष्यत्वेनददौभीष्मोवसूनि विधानि विविधानिच २ गृहंचसुपरिछन्नंधनधान्यसमाकुलं भारद्वाजायसु
प्रीतःप्रत्यपादयतप्रभुः ३ संतांछिष्यान्महेष्वासःप्रतिजग्राहकौरवान पांडवानधार्त्तराष्ट्रांश्चद्रोणोमुदितमानसः ४ प्रतिगृह्य
चतान्सर्वान्द्रोणोमुदितमानसः रहस्येकःप्रतीतात्मा कृतोपसदनांस्तथा ५ द्रोणउवाच कार्यंमेकांक्षितंकिंचिद्धृदिसंपरिवर्त्तते
कृतास्त्रैस्तत्प्रदेयंमेतदृतंवदतानघाः ६ वैशंपायनउवाच तच्छ्रुत्वाकौरवेयास्तेतूष्णीमासनविशांपते अर्जुनस्तुततःसर्वं
प्रतिजज्ञेपरंतप ७ ततोर्जुनंतदामूर्ध्निसमाघ्रायपुनःपुनःप्रीतिपूर्वंपरिष्वज्यप्ररुरोदमुदातदा ८ ततोद्रोणःपांडुपुत्रानस्त्राणि
विविधानिच ग्राहयामासदिव्यानिमानुषाणिचवीर्यवान ९ राजपुत्रास्तथाचान्येसमेत्यभरतर्षभ अभिजग्मुस्ततोद्रोणम
स्त्रार्थेद्विजसत्तमः १० वृष्णयश्चांधकाश्चैवनानादेशाश्चपार्थिवाः सूतपुत्रश्चराधेयोगुरुंद्रोणमियात्तदा ११ स्पर्द्धमानस्तु
पार्थेनसूतपुत्रोत्यमर्षणः दुर्योधनंसमाश्रित्यसोवमन्यतपांडवान अभ्ययात्सततोद्रोणंधनुर्वेदचिकीर्षया शिक्षाभुज
वलोद्योगेस्तेषुसर्वेषुपांडवः १३ अस्त्रविद्यानुरागाच्चविशिष्टोभवदर्जुनः तुल्येष्वस्त्रप्रयोगेषुलाघवेसौष्ठवेच १४

सौष्ठवे १

राम०
२५०

स्यपादमिगात तुल्योभवदितिपार्थः १३ अतएवतेषुविशिष्टः एतेदेवाहतुल्येष्विति १४ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

१५ कमंडलुं सूक्ष्ममुखत्वाद्विलंवेनपूरणीयं १६ कुंभं विस्तीर्णमुखत्वात्स घटः पूरणीयं तस्य फलमाह याचदिति आश्रोहत तत्कृतवान् १७ १८ विशेषोपचये गुणाख्ये हेत्रय पृथक्
सहैवास्ते अतो न व्यहीयत न विहीनो भूत् १९ योगंएकाग्र्यं २० सूदं सूपकारं प्रति २१ अन्नं न देयं किं तु अंधकारे मुखादन्यत्र ग्रासाः पतिष्यंतीति नान्नं देयमि

सर्वेषामेव शिष्याणां बभूवाभ्यधिकोर्जुनः ऐंद्रिरप्रतिमं द्रोणादुपदेशेष्वमन्यत २५ एवं सर्वकुमाराणामिष्वस्त्रं प्रत्यपादयत् कमंडलुं
च सर्वेषां प्रायच्छच्चिरकारणात् १६ पुत्राय च ददौ कुंभमविलंवनकारणात् यावत्ते नोपगच्छंति तावदस्मै परां क्रियां द्रोण आ
चष्ट पुत्राय तत्कर्म जिष्णुरौहत १७ ततः स वारुणास्त्रेण पूरयित्वा कमंडलुं सममाचार्यपुत्रेण गुरुमभ्येति फाल्गुनः १८
आचार्यपुत्रात्तस्मात्तु विशेषोपचये पृथक् न व्यहीयत मेधावी पार्थोप्यस्त्रविदां वरः १९ अर्जुनः परमं यत्नमातिष्ठद्गुरुपूजने अ
स्त्रे च परमं योगं प्रियो द्रोणस्य चाभवत् २० तं दृष्ट्वा नित्यमुद्युक्तमिष्वस्त्रं प्रति फाल्गुनं आहूय वचनं द्रोणो रहः सूदमभाष
त २१ अंधकारेर्जुनायान्नं न देयं ते कदाचन न चाख्येयमिदं चापि मद्वाक्यं विजये त्वया २२ ततः कदाचिद्भुंजाने प्रववौ वायु
रर्जुने तेन तत्र प्रदीपः स दीप्यमानो विलोपितः २३ भुंक्त एव तु कौंतेयो नास्यादन्यत्र वर्त्तते हस्तस्तेजस्विनस्तस्य अनुग्रह
कारणात् २४ तदभ्यासकृतं मत्वा रात्रावपि स पांडवः योग्यां चक्रे महाबाहुर्धनुषा पांडुनंदनः २५ तस्य ज्यातलनिर्घो
षं द्रोणः शुश्राव भारत उपेत्य चैनमुत्थाय परिष्वज्येदमब्रवीत् २६ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ॥

ति सत्वयावाच्य इति भावः विजये अर्जुने अयं भावः अत्यभ्यासान्मुखादन्यत्र ग्रासान पतंते च एवं तमसि शिक्षा दिलक्ष्यादन्यत्र शरा अपि न पतेयुरिति कार्जुनो
पदिके ने दम्भुक्तमिति यच्छेत्तर्हि लौकिक एवायमर्थ इति तं प्रति वक्तव्यं न तु द्रोणावाक्यमेतदिति तिति २२ एवं गुरुणा शिष्यस्याभ्यासे प्रवृत्ते लाघवितायां ततः
प्रागेवार्जुनः स्वदृष्टांतेनैव ततस्तान्वानित्याह द्वाभ्यां तत इति २३ अनुग्रहणां अभ्यासः २४ योग्यां अभ्यासं २५ श्रवणानंतरं उत्थायोपेत्येति क्रमः २६

२८ संकीर्णयुद्धेयुगपदनेकायुधप्रयोगेयुगपदनेकैःसहयुद्धेवा २९ ३१ तेषामन्वन्वेषणयातेष्योधिकोमाभूदितिबुद्ध्या ३२ महीमयंमन्मयं ३३ इषस्त्र
इषुप्रयोगेयोगःरकाग्र ३४ लघुत्वंशीघ्रप्रयोक्तृत्वं ३५ ३६ उपकरणांश्ववागुरादिमुख्यंतत्करणंश्वायुधमेव ३७ ३९ अस्त्रेप्रयोगेलाघवंकौश

द्रोणउवाच प्रयतिष्येतथाकर्तुंयथानान्योधनुर्धरः त्वत्समोभवितालोकेसत्यमेतद्ब्रवीमिते २७ वैशंपायनउवाच ततोद्रोणोर्जु
नंभूयोहयेषुचगजेषुच रथेषुभूमावपिचरणशिक्षामशिक्षयत २८ गदायुद्धेसिचर्यायांतोमरप्रासशक्तिषु द्रोणःसंकीर्णयु
द्धेचशिक्षयामासकौरवान् २९ तस्यतत्कौशलंश्रुत्वाधनुर्वेदजिघृक्षवः राजानोराजपुत्राश्चसमाजग्मुःसहस्रशः ३० ततो
निषादराजस्यहिरण्यधनुषःसुतः एकलव्योमहाराजद्रोणमभ्याजगामह ३१ नसतंप्रतिजग्राहनैषादिरितिचिंतयन् शिष्यं
धनुषिधर्मज्ञस्तेषामेवान्ववेक्षया ३२ सतुद्रोणस्यशिरसापादौगृह्यपरंतपः अरण्यमनुसंप्राप्यकृत्वाद्रोणंमहीमयं ३३
तस्मिन्नाचार्यवृत्तिंचपरमामास्थितस्तदा इष्वस्त्रेयोगमातस्थेपरंनियममास्थितः ३४ परयाश्रद्धयोपेतोयोगेनपरमेणच
विमोक्षादानसंधानेलघुत्वंपरमापसः ३५ अथद्रोणाभ्यनुज्ञाताःकदाचित्कुरुपांडवाः रथैर्विनिर्ययुःसर्वेमृगयामरिम
र्दनः ३६ तत्रोपकरणंगृह्यनरःकश्चिद्यदृच्छया राजन्ननुजगामैकःश्वानमादायपांडवान् ३७ तेषांविचरतांतत्रतत्तत्क
र्मचिकीर्षया श्वाचरन्सवनेमूढोनैषादिंप्रतिजग्मिवान् ३८ सकृष्णंमलदिग्धांगंकृष्णाजिनजटाधरं नैषादिंश्वासमा
लक्ष्यभषंतस्थौतदंतिके ३९ तदातस्यायभषतःशुनःसप्तशरान्मुखे लाघवंदर्शयन्नस्त्रेमुमोचयुगपद्यथा ४० स
तुश्वाशरपूर्णास्यःपांडवानाजगामह तंदृष्ट्वापांडवावीराःपरंविस्मयमागताः ४१ लाघवंशब्दवेधित्वंदृष्ट्वातत्परमंतदा प्रे
क्ष्यतंव्रीडिताश्चासन्प्रशशंसुश्चसर्वशः ४२ तंततोन्वेषमाणास्तेवनेवननिवासिनं ददृशुःपांडवाराजन्नस्यंतमनिशंशरान् ४३

लांयेनशराःमुखेप्रविष्टाएवननुतच्छिद्रवंतः ४० ४१ ४४ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ॥

धं

पञ्चवेतनं गुरुदक्षिणारूपं ५४ स सत्यसंधं नैषादिं दृष्ट्वा प्रीतोऽब्रवीदिदं एवं कर्तव्यमिति वा एकलव्यमभाषतेति कश्चित्पठंति तत्र एवं कर्तव्यमिति तर्जनीमध्यमाभ्यां शरसं

२१

एकलव्य उवाच निषादाधिपतेर्वीर हिरण्यधनुषः सुतं द्रोणशिष्यं च मां विद्धि धनुर्वेदकृतश्रमं ४५ वैशंपायन उवाच ते तमाज्ञाय तत्
त्वेन पुनरागम्य पांडवाः यथावृत्तं वने सर्वं द्रोणायाचख्युरद्भुतं ४६ कौंतेयस्त्वर्जुनो राजन्नेकलव्यमनुस्मरन् रहो द्रोणं समासाद्य
प्रणयादिदमब्रवीत् ४७ अर्जुन उवाच तदाहं परिरभ्यैकः प्रीतिपूर्वमिदं वचः भवतोक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यति ४८ अ
थ कस्मान्मद्विशिष्टो लोकादपि च वीर्यवान् अन्योस्ति भवतः शिष्यो निषादाधिपतेः सुतः ४९ वैशंपायन उवाच मुहूर्तमिव तं द्रोणश्चिंत
यित्वा विनिश्चयं सव्यसाचिनमादाय नैषादिं प्रतिजग्मिवान् ५० ददर्श मलदिग्धांगं जटिलं चीरवाससं एकलव्यं धनुष्पाणिमस्यंतम
निशं शरान् ५१ एकलव्यस्तु तं दृष्ट्वा द्रोणमायांतमंतिकात् अभिगम्योपसंगृह्य जगाम शिरसा महीं ५२ पूजयित्वा ततो द्रोणं विधिव
त्स निषादजः निवेद्य शिष्यमात्मानं तस्थौ प्रांजलिरग्रतः ५३ ततो द्रोणोऽब्रवीद्राजन्नेकलव्यमिदं वचः यदि शिष्योसि मे वीर वेतनं
दीयतां मम ५४ एकलव्यस्तु तच्छ्रुत्वा प्रीयमाणोऽब्रवीदिदं ५४ एकलव्य उवाच किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः नहि किं
चिददेयं मे गुरवे ब्रह्मवित्तम ५५ वैशं॰ तमब्रवीत्त्वयांगुष्ठो दक्षिणो दीयतामिति एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणं ५६
प्रतिज्ञामात्मनो रक्षन्सत्ये च नियतः सदा तथैव हृष्ट[illegible]वदनस्तथैवादीनमानसः ५७ छित्त्वा विचार्य तं प्रादाद्द्रोणायां
गुष्ठमात्मनः ततः शरं तु नैषादिरंगुलीभिर्व्यकर्षत न तथा च स शीघ्रोऽभूद्यथा पूर्वं नराधिप ५८ ततोऽर्जुनः प्रीतमना बभूव विगत
ज्वरः द्रोणश्च सत्यवागासीन्नान्योऽभिभविताऽर्जुनं ५९ द्रोणस्य तु तदा शिष्यौ गदायोग्यौ बभूवतुः दुर्योधनश्च भीमश्च सदा संरब्धमान
सौ ६० ॥

त्वाङ्गुष्ठाकर्षणं कर्तव्यमिति नीयदर्शयति ५४ ५७ छित्वेति अविचार्य इति छेदः ५८ ५९ गदायोग्यौ गदायुद्धाभ्यासवंतौ ६० ॥ ७ ॥ ॥

त्साहकौत्साहः खड्गादिमुष्टिः तरुसरुप्रयोधानेपुरुकुशलो ६१ रथश्रेष्ठः सप्तमीशौंडेरितिसमासः ६२ क्षेप्रहरणज्ञानेकथंप्रहरन्तीतिविचारे ६६ भासंनीलपक्षंपक्षि

आ०
२४२

अश्वत्थामारहस्येषुसर्वेष्वभ्यधिकोऽभवत् तथातिपुरुषानन्यान्त्सारुकौयमजावुभौ ६० युधिष्ठिरोरथश्रेष्ठः सर्वत्रतुधनंजयः प्र
थितः सागरांतायांरथयूथपयूथपः ६२ बुद्धियोगबलोत्साहैः सर्वास्त्रेषुचनिष्ठितः अस्त्रेगुर्वनुरागेचविशिष्टोऽभवदर्जुनः ६३
तुल्येष्वस्त्रोपदेशेषुसौष्ठवेनचवीर्यवान् एकः सर्वकुमाराणांबभूवातिरथोऽर्जुनः ६४ प्राणाधिकंभीमसेनंकृतविद्यंधनंजयं धा

परस्य४

र्तराष्ट्रादुरात्मानोनामृष्यंतनरं ६५ तांस्तुसर्वान्समानीयसर्वविद्यास्त्रशिक्षितान् द्रोणः प्रहरणज्ञानेजिज्ञासुः पुरुषर्षभः ६६ कृ
त्रिमंभासमारोप्यवृक्षाग्रेशिल्पिभिः कृतं अविज्ञातंकुमाराणांलक्ष्यभूतमुपादिशत् ६७ द्रोणउवाच शीघ्रंभवंतः सर्वेपिधनूंष्यादा
यसर्वशः भासमेतंसमुद्दिश्यतिष्ठध्वंसंधितेषवः ६८ मद्वाक्यसमकालंतुशिरोस्यविनिपात्यतां एकैकशोनियोक्ष्यामितथाकुरु
तपुत्रकाः वैशंपायनउवाच ततोयुधिष्ठिरंपूर्वमुवाचांगिरसांवरः संधत्स्वबाणंदुर्धर्षमद्वाक्यांतेविमुंचत ७० ततो[illegible]युधिष्ठिरः स्थि१
पूर्वंधनुर्गृह्यपरंतपः तस्थौभासंसमुद्दिश्यगुरुवाक्यप्रचोदितः ७१ ततोविततधन्वानंद्रोणस्तंकुरुनंदनं समुहूर्तादुवाचेदं
वचनंभरतर्षभ ७२ पश्यैनंत्वंद्रुमाग्रस्थंभासंनरवरात्मज पश्यामीत्येवमाचार्यंप्रत्युवाचयुधिष्ठिरः समुहूर्तादिवपुनर्द्रोणस्तं
प्रत्यभाषत ७३ द्रोणउवाच अथवृक्षमिमंमांवाभ्रातॄन्वापिप्रपश्यसि ७४ तमुवाचसकौंतेयः पश्याम्येनंवनस्पतिं भवंतंच
तथाभ्रातॄन्भासंचेतिपुनः पुनः ७५ तमुवाचापसर्येतिद्रोणोप्रीतमनाइव नैतच्छक्यंत्वयावेद्धुंलक्ष्यमित्येवकुत्सयन् ७६ ॥

एभ
२४२

णांशक्तंतस्मित्पत्त्रेगध्रमित्यपरे ६७ ६८ अंगिरसांवरः द्रोणः ७० ७२ भासंपश्यतइत्युक्तास्तदृष्टिमेवेत्यर्थः ७३ ७५ तस्मितिवृक्षादिदर्शनात्व्यग्रदृष्टित्वंतेषां
ज्ञात्वासर्वानपिनिराचकार ७६

७८ अध्यायः ततोपः ८ तस्य भासस्य नगस्थस्य स्वं हृद्गृस्थितस्य ९ सानुबंधसहायं १० अवगाढं जलावगाहितं ११ मोक्षध्वं मोचयध्वं १२ १३ क्रियायेतं

ततो दुर्योधनादींस्तान्धार्त्तराष्ट्रान्महायशाः तेनैव क्रमयोगेन जिज्ञासुः पर्यपृच्छत ७७ अन्यांश्च शिष्यान्भीमादीन्राज्ञश्चैवान्यदेश जात तथा च सर्वे ते तत्सर्वं पश्यामइति कुत्सिताः ७८ इत्यादिपर्वणि वैशंपायनउवाच ततो धनंजयं द्रोणः स्मयमानोभ्यभाषत त्वयेदानीं प्र हर्त्तव्यमेतल्लक्ष्यं विलोक्यतां १ मद्वाक्यसमकालं ते मोक्तव्योत्र भवेच्छरः वितत्य कार्मुकं पुत्र तिष्ठतावन्मुहूर्त्तकं २ एवमुक्तः सव्यसाची मंडलीकृतकार्मुकः तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः ३ मुहूर्त्तादिव तं द्रोणस्तथैव समभाषत पश्यस्येनं स्थितं भासं द्रु मं मामपि चार्जुन ४ पश्याम्येकं भासमिति द्रोणं पार्थोभ्यभाषत न तु वृक्षं भवंतं वा पश्यामीति च भारत ५ ततः प्रीतमना द्रोणो मुहूर्त्तादि व तं पुनः प्रत्यभाषत दुर्द्धर्षः पांडवानां महारथं ६ भासं पश्यसि यद्येनं तथा ब्रूहि पुनर्वचः शिरः पश्यामि भासस्य न गात्रमिति सोब्रवीत ७ अर्जुनेनैवमुक्तस्तु द्रोणो हृष्टतनूरुहः मुंचस्वेत्यब्रवीत्पार्थं स मुमोचाविचारयन् ८ ततस्तस्य नगस्थस्य क्षुरेण निशितेन च शिर उत्कृत्य तरसा पातयामास पांडवः ९ तस्मिन्कर्मणि संसिद्धे पर्यष्वजत पांडवं मेने च द्रुपदं संख्ये सानुबंधं पराजितं १० कस्यचित्त्वथ कालस्य सशि ष्योंगिरसां वरः जगाम गंगामभितो मज्जितुं भरतर्षभ अवगाढमथो द्रोणं सलिले सलिलेचरः ग्राहो जग्राह बलवान् जंघांते काल [illegible] चोदितः ११ स समर्थोपि मोक्षाय शिष्यान्सर्वानचोदयत ग्राहं हत्वा तु मोक्षध्वं मा मिति त्वरयन्निव १२ तद्वाक्यसमकालं तु बीभत्सुर्निशितैः शरैः आवार्यैः पंचभिर्ग्राहं मग्नमंभस्यताडयत १३ इतरे त्वथ संमू ढास्तत्र तत्र प्रपेदिरे तं तु दृष्ट्वा क्रियोपेतं द्रोणोमन्यत पांडवं १४ विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा स पार्थबाणैर्बहुधा खंड शः परिकल्पितः १५

कृतकार्य १५ ॥ ६ ॥ ॥ ॥

१६ असामान्यं असाधारणं १९ २२ इति श्रीमत्पदवाक्यमर्यादाधुरंधुरचतुर्द्धरवंशावतंस आदिपर्वणि संभवार्थप्रकाशः समाप्तः कृतास्त्रान्धार्त्तराष्ट्रां
श्चेति ३ कर्मकुमारशिक्षाख्यं ४ मन्यसे स्वशिक्षादर्शनस्य कालं विधानाय परं गमयसे मे ४ ५ निर्वेदात्तद्दुःखात्तास सचक्षुषां स्पृहयामि स्वस्यापि तिशेषः ६ क्षत्त

आ० २५३

गारुः पंचत्वमापेदे जंघांतावत्क्रमहात्मनः अथाब्रवीन्महात्मानं भारद्वाजो महारथं १६ गृहाणेमं महाबाहो विशिष्टमतिदुर्धरं अस्त्रं ब्रह्म
शिरो नाम सप्रयोगनिवर्त्तनं १७ न च ते मानुषेष्वेतत्प्रयोक्तव्यं कथंचन जगद्विनिर्दहेदेतदल्पतेजसि पातितं १८ असामान्यमिदं
तात लोकेष्वस्त्रं निगद्यते तद्धारयेथाः प्रयतः शृणु चेदं वचो मम १९ बाधेत मानुषः शत्रुर्यदि त्वां वीर कश्चन तद्वधाय प्रयुंजीथास्तदस्त्रमा
हवे २० तथेति संप्रतिश्रुत्य बीभत्सुः स कृतांजलिः जग्राह परमास्त्रं तदाह चैनं पुनर्गुरुः २१ भविता त्वत्समो नान्यः पुमांल्लोके धनुर्धरः
२२ इत्यादिपर्वणि संभवे वैशंपायन उवाच कृतास्त्रान्धार्त्तराष्ट्रांश्च पांडुपुत्रांश्च भारत दृष्ट्वा द्रोणोऽब्रवीद्राजन्धृतराष्ट्रं जनेश्वरं १
कृपस्य सोमदत्तस्य बाल्हीकस्य च धीमतः गांगेयस्य च सान्निध्ये व्यासस्य विदुरस्य च २ राजन्संप्राप्तविद्यास्ते कुमाराः कुरुसत्तम ते
दर्शयेयुः स्वां शिक्षां राजन्ननुमते तव ३ ततोऽब्रवीन्महाराजः प्रहृष्टेनांतरात्मना धृतराष्ट्र उवाच भारद्वाज महत्कर्म कृतं ते द्विजस
त्तम ४ यदानुमन्यसे कालं यस्मिन्देशे यथा यथा तथा तथा विधानाय स्वयमाज्ञापयस्व मां ५ स्पृहयाम्यद्य निर्वेदात्पुरुषाणां सच
क्षुषां अस्त्रहेतोः पराक्रांतान्ये मे द्रक्ष्यंति पुत्रकान् ६ क्षत्तर्यद्गुरुराचार्यो ब्रवीति कुरु तत्तथा नहीदृशं प्रियं मन्ये भविता धर्मवत्स
ल ७ ततोऽपजानमामंत्र्य निर्गतो विदुरो बहिः भारद्वाजो महाप्राज्ञो मापयामास मेदिनीं ८ समामवृक्षां निर्गुल्मामुदक्प्रस्रव
णान्वितां तस्यां भूमौ बलिं चक्रे तिथौ नक्षत्रपूजिते ९

आमि६१

क्षत्तः हे विदुर ७ ८ निर्गुल्मां तृणासमूलं पिंडरहितं उदक्प्रस्रवणान्वितां उदकुनिम्नां ९ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

सभ० २५३

तदर्थं वस्वर्थं समाजे वीरसमूहे स्त्रवपुषे डिंडिमशब्देन हते सति वलंचक्रे कृतिपूर्वेणा नृपः १० एतः स्त्रीणां प्रेक्षार्थमगारं मचांश्च कृतवेषां प्रेक्षार्थं रंगमध्ये मोचक्रुरिति द्वयोः संबंधः ११ १२ १९ सांगारकः सभौमः अंशुमानं चंद्र २० २३ बहुकक्ष्याः वस्त्रादिना संवृतां सपक्षोदरां इत्यर्थः कक्षावाऊमूले २३

मा २ नं २

अवघुष्टे समाजे च तदर्थं वदतां वर रंगभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि १० प्रेक्षागारं सुविहितं चक्रुस्ते तस्य शिल्पिनः राज्ञः सर्वायुधोपेतं स्त्रीणां चैव नरर्षभः ११ मंचांश्च कारयामासुस्तत्र जानपदा जनाः विपुलानुच्छ्रयोपेतान् शिविकाश्च महाधनाः १२ तस्मिंस्ततो हनि प्राप्ते राजा ससचिवस्तदा भीष्मं प्रमुखतः कृत्वा कृपं चाचार्यसत्तमं १३ मुक्ताजालपरिक्षिप्तं वैदूर्यमणिशोभितं शातकुंभमयं दिव्यं प्रेक्षागारमुपागमत् १४ गांधारी च महाभागा कुंती च जयतां वर स्त्रियश्च राज्ञः सर्वास्ताः सप्रेष्याः सपरिच्छदाः १५ हर्षादारुरुहुर्मंचान् मेरुं देवस्त्रियो यथा ब्राह्मणक्षत्रियाद्यं च चातुर्वर्ण्यं पुराद्रुतं १६ दर्शनेप्सुः समभ्यागात् कुमाराणां कृतास्त्रतां क्षणेनैकस्थतां तत्र दर्शनेप्सु जगाम ह १७ प्रवादितैश्च वादित्रैर्जनकौतूहलेन च महार्णवस्य क्षुब्धस्य समाजः सोभवत्तदा १८ ततः शुक्लांबरधरः शुक्लयज्ञोपवीतवान् शुक्लकेशः सितश्मश्रुः शुक्लमाल्यानुलेपनः १९ रंगमध्यं तदाचार्यः सपुत्रः प्रविवेश ह नभो जलधरैर्हीनं सांगारक इवांशुमान् २० स यथासमयं चक्रे बलिं बलवतां वरः ब्राह्मणां [illegible] स्तत्र सुमंत्रज्ञान् कारयामास मंगलं २१ सुखपुण्याहघोषस्य पुण्यस्य समनंतरं विविशुर्विविधं गृह्य शस्त्रोपकरणं नराः २२ ततो बद्धांगुलित्राणा बद्धकक्ष्या महारथाः बद्धतूणाः सधनुषो विविशुर्भरतर्षभाः २३ अनुज्येष्ठं तु ते तत्र युधिष्ठिरपुरोगमाः चक्रुरस्त्रं महावीर्याः कुमाराः परमाद्भुतं २४ केचिच्छराक्षेपभयाच्छिरांस्यवननामिरे मनुजा धृष्टमपरे वीक्षांचक्रुः सुविस्मिताः २५ ते स्म लक्ष्याणि विभिदुर्बाणैर्नामांकशोभितैः विविधैर्लाघवोत्सृष्टैरुह्यंतो वाजिभिर्द्रुतं २६ ॥ ॥

चा मे ४

विं ३

अस्त्रं अस्त्रविद्यां चक्रुः प्रादुश्चक्रुः [illegible] २४ धृष्टं निर्भयं यथास्यात्तथा २५ लाघवोत्सृष्टैः गतिचातुरीप्रयुक्तैः उह्यंतः उह्यमानाः २६ ॥ ७ ॥

गंधर्वनगराकारमद्भुतरूपं २७ २८ धनुषि मार्गान्चलल्लक्ष्यपातनादीन्रथचर्यासु मार्गान् शीघ्रगतप्रत्यागतप्रदक्षिणाप्रदक्षिणामंडलगत्यादिरूपान् २९
त्सरुमार्गान् तिर्यगूर्ध्वाधःखड्गसंचरणरूपान् सर्वासु भूमिषु रथ्यादिपृष्ठेषु भुवि वा ३० लाघवं शैघ्र्यं सौष्ठवं चातुरी। एकेनैव खड्गेन समंताद्भ्रमितेन युगपदनेकायुधनि
वारणं शोभां सर्वतो ज्वलज्ज्वालापमानेकखड्गभ्रमंडलांतरंगतत्वेनाभिनवां। स्थिरत्वमभीतत्वं दृढमुष्टितां खड्गमतां हस्त एव पतितं स्खलति न तं गुलपदत्यर्थः। प्रयोगं निद

तत्कुमारबलं तत्र गृहीतशरकार्मुकं गंधर्वनगराकारं प्रेक्ष्य ते विस्मिताभवन् २७ सहसा चुक्रुशुश्चान्ये नराः शतसहस्रशः विस्मयो
त्फुल्लनयनाः साधु साध्विति भारत २८ कृत्वा धनुषि ते मार्गान्रथचर्यासु चासकृत् गजपृष्ठेश्वपृष्ठे च नियुद्धे च महाबलाः २९ गृ
हीतखड्गचर्माणस्ततो भूयः प्रहारिणः त्सरुमार्गान्यथोद्दिष्टांश्चेरुः सर्वासु भूमिषु ३० लाघवं सौष्ठवं शोभां स्थिरत्वं दृढमुष्टितां ददृशु
स्तत्र सर्वेषां प्रयोगं खड्गचर्मणोः ३१ अथ तौ नित्यसंहृष्टौ सुयोधनवृकोदरौ अवतीर्णौ गदाहस्तावेकशृंगाविवाचलौ ३२ बद्धकक्षौ
महाबाहू पौरुषे पर्यवस्थितौ बृंहंतौ वाशिताहेतोः समदाविव कुंजरौ ३३ तौ प्रदक्षिणसव्यानि चक्रतुर्वै महाबलौ चेरतुर्मंडलगतौ
समदाविव कुंजरौ ३४ विदुरो धृतराष्ट्राय गांधार्याः पांडवारणिः न्यवेदयेतां तत्सर्वं कुमाराणां विचेष्टितं ३५ इत्यादिपर्वण्यस्त्रदर्शने वै
शंपायन उवाच कुरुराजे हि रंगस्थे भीमे च बलिनां वरे पक्षपातकृतस्नेहः स द्विधेवाभवज्जनः १ हा भीम कुरुराजेति हा भीम इति जल्प
तां पुरुषाणां सुविपुलाः प्रणादाः सहसोत्थिताः २ ततः क्षुब्धार्णवनिभं रंगमालोक्य बुद्धिमान् भारद्वाजः प्रियं पुत्रमश्वत्थामा
नमब्रवीत् ३ द्रोण उवाच वारयैतौ महावीर्यौ कृतयोग्यावुभावपि माभूद्रंगप्रकोपोयं भीमदुर्योधनोद्भवः ४ ॥ ७ ॥

र्शनं ३१ संहृष्टौ परस्परं जेतुं सकामौ ३२ बृंहंतौ शब्दं कुर्वाणौ वाशिता हस्तिनी ३३ चेरतुः पद्मं मंडलगतौ अलातचक्रवद्भ्रमणमागता परिवेदं यातगती
३४ पांडवारणिः कुंती ३५। अध्यायः कुरुराजे दुर्योधने १ हा विस्मये आश्चर्यं भीमदुर्योधनौ कुरुराज इत्यर्थः हुभीमेत्यपपाठः ३ कृतयोग्यौ सुशिक्षितौ ४ ॥

६ इंद्रानुजसमः विष्णुतुल्यः ७ बद्धगोधांगुलित्राणो येन गोधा तलात्वं ज्याघातवारणं अंगुलित्राणं प्रसिद्धं चर्ममयं ८ कांचनेति तूणीकार्मुककवचानां तत्र भाजा...

वैशं ततस्तावुद्यतगदौ गुरुपुत्रेण वारितौ युगांतानिलसंक्षुब्धौ महावेलाविवार्णवौ ५ ततो रंगांगणगतो द्रोणो वचनमब्रवीत् निवार्य वादित्रगणं महामेघनिभस्वनं ६ यो मे पुत्रात्प्रियतरः सर्वशस्त्रविशारदः ऐंद्रिरिंद्रानुजसमः स पार्थो दृश्यतामिति ७ आचार्यवचनेनाथ कृतस्वस्त्ययनो युवा बद्धगोधांगुलित्राणः पूर्णतूणः ससिकार्मुकः ८ कांचनं कवचं बिभ्रत्प्रत्यदृश्यत फाल्गुनः सार्कः सेंद्रायुधतडित्ससंध्य इव तोयदः ९ ततः सर्वस्य रंगस्य समुत्पिंजलकोऽभवत् प्रावाद्यंत च वाद्यानि सशंखानि समंततः १० एष कुंतीसुतः श्रीमानेष मध्यमपांडवः एष पुत्रो महेंद्रस्य कुरूणामेष रक्षिता ११ एषोऽस्त्रविदुषां श्रेष्ठ एष धर्मभृतां वरः एष शीलवतां चापि शीलज्ञाननिधिः परः इत्येवं तुमुला वाचः शुश्रुवुः प्रेक्षकेरिताः कुंत्याः प्रस्नवसंयुक्तैरस्रैः क्लिन्नमुरोऽभवत् १३ तेन शब्देन महता पूर्णश्रुतिरथाब्रवीत् धृतराष्ट्रो नरश्रेष्ठो विदुरं हृष्टमानसः १४ क्षत्तः क्षुब्धार्णवनिभः किमेष सुमहास्वनः सहसैवोत्थितो रंगे भिंदन्निव नभस्तलं १५ विदुर उवाच एष पार्थो महाराज फाल्गुनः पांडुनंदनः अवतीर्णः सकवचस्तत्रैष सुमहास्वनः १६ धृतराष्ट्र उवाच धन्योऽस्म्यनुगृहीतोऽस्मि रक्षितोऽस्मि महामते पृथारणिसमुद्भूतैस्त्रिभिः पांडववह्निभिः १७ वैशं तस्मिन्प्रमुदिते रंगे कथंचित्प्रत्युपस्थिते दर्शयामास बीभत्सुराचार्याय स्वलाघवं १८ आग्नेयेनासृजद्वह्निं वारुणेनासृजत्पयः वायव्येनासृजद्वायुं पार्जन्येनासृजद्घनान् १९

र्जुनस्य वक्रमादर्केंद्रायुधतडित्संध्यातोयदैरुपमा ९ समुत्पिंजलकः उत्कण्ठता प्रमुदिते रंगे ध्वनिवाक्यशेषात् अनेककलकलशब्दो व्याकुलत्वं वेत्याहुः १२ अस्रैः प्रेमाश्रुभिः १९

२१ सुकुमारं सुरार्घं सुकुमुदं पुंडरीकादीनि लक्ष्माणि अविचार्य विध्यन् सत्त्वं गुरुं घनावयवं च सो विध्यत २२ २३ गव्ये गोसंबंधिनि २९ सावित्रेण रुस्तनक्षत्रेण

भा०
२४५

भीमेनप्राविशद्भूमिंपार्वतेनामवज्रिणः अंतर्हितेनचास्त्रेणपुनरंतर्हितोऽभवत् २० क्षणात्सांप्रतंक्षणाद्दूरंक्षणाच्चरथभूगतः
क्षणेनरथमध्यस्थःक्षणेनावतरन्महीं २१ सुकुमारंचसत्त्वं [illegible] गुरुंचापिगुरुप्रियः सोऽच्छवेनाभिसंक्षिप्तःसोविध्यद्विविधैःशरैः २२ भ्रमतश्चवराहस्यलोहस्यप्रमुखेसमं पंचबाणानसंसक्तान्समुमोचैकबाणवत् २३ गव्येविषाणकोषेचवलोरजवलवि
नि निचखानमहावीर्यःसायकानेकविंशतिः २४ इत्येवमादिसंमत्तवत्कुंधनुषिचानघ गदायांशस्त्रकुशलोमंडलानिप्रदर्शयत् २५ ततःसमाप्तभूयिष्ठेतस्मिन्कर्मणिभारत मंदीभूतेसमाजेचवादित्रस्यचनिःस्वने २६ द्वारदेशात्समुद्भूतोमहात्माबलसूचकः वज्रनिष्पेषसदृशःशुश्रुवेभुजनिःस्वनः २७ दीर्यतेकिंनुगिरयःकिंस्विद्भूमिर्विदीर्यते किंस्विदापूर्यतेव्योमजलधाराघनैर्घनैः २८ रंगस्यैवंमतिरभूत्क्षणेनवसुधाधिपः द्वारंचाभिमुखाःसर्वेबभूवुःप्रेक्षकास्तदा २९ पंचभिर्भ्रातृभिः [illegible] पार्थैर्द्रोणःपरिवृतोबभौ पंचतारेणसंयुक्तःसावित्रेणेवचंद्रमाः ३० अश्वत्थामासहितंभ्रातॄणांशतमूर्जितं दुर्योधनममित्रघ्नमुत्थितंपर्यवारयत् ३१ सतैस्तदाभ्रातृभिरुद्यतायुधैर्गदाग्रपाणिः समवस्थितैर्वृतःबभौयथादानवसंक्षये पुरापुरंदरोदेवगणैःसमावृतः ३२ इत्यादिपर्वण्यस्त्रदर्शने वैशंपायनउवाच दत्तेऽवकाशेपुरुषैर्विस्मयोत्फुल्ललोचनः विवेशरंगंविस्तीर्णंकर्णःपरपुरंजयः सहजंकवचंबिभ्रत्कुंडलोद्योतिताननः सधनुर्बद्धनिस्त्रिंशःपादचारीवपर्वतः २ कन्यागर्भःपृथुयशाःपृथायाःपृथुलोचनः तीक्ष्णांशोर्भास्करस्यांशःकर्णोऽरिगणसूदनः ३ ४ ॥ ॥

एम०
२४५

३० ३१ गदाग्रं आलंबनं यस्य तादृशः पाणिर्यस्य सगदाग्रपाणिः गदामात्रसहायः इत्यर्थः अध्याये १३ ॥ ४ ॥ ४ ॥ ॥

सिंहर्षभगजेंद्राणांबलवीर्यपराक्रमः दीप्तिकांतिद्युतिगुणैःसूर्येंदुज्वलनोपमः ४ प्रांशुःकनकतालाभःसिंहसंहननोयुवा असंख्येयगु
णःश्रीमानभास्करस्यात्मसंभवः ५ सनिरीक्ष्यमहाबाहुःसर्वतोरंगमंडलं प्रणामंद्रोणकृपयोर्नात्यादृतमिवाकरोत ६ ससमाजजनैः
सर्वैर्निश्चलःस्थिरलोचनः कोयमित्यागतक्षोभःकौतूहलपरोभवत ७ सोब्रवीन्मेघगंभीरस्वरेणवदतांवरः यंत्रोत्क्षिप्तइवोत्तस्थौक्षि
प्रंवैसर्वतोजनः १० प्रीतिश्चमनुजव्याघ्रंदुर्योधनमुपाविशत ह्रीश्चक्रोधश्चबीभत्सुंक्षणेनान्वाविवेशह ११ ततोद्रोणाभ्यनुज्ञा
तःकर्णःप्रियरणःसदा यत्कृतंतत्रपार्थेनतच्चकारमहाबलः १२ अथदुर्योधनस्तत्रभ्रातृभिःसहभारतः कर्णंपरिष्वज्यमुदायततो
वचनमब्रवीत १३ दुर्योधनउवाच स्वागतंतेमहाबाहोदिष्ट्याप्राप्तोसिमानद अहंचकुरुराज्यंचयथेष्टमुपभुज्यतां १४ कर्णउ
वाच कृतंसर्वमहंमन्येसखित्वंचत्वयावृणे द्वंद्वयुद्धंचपार्थेनकर्तुमिच्छाम्यहंप्रभो १५ [illegible] भुंक्ष्वभोगान्मयासार्द्धंबंधूनांप्रियकृद्भ
व दुर्हृदांकुरुसर्वेषांमूर्ध्निपादमरिंदम १६ वैशंपायनउवाच ततःक्षिप्तमिवात्मानंमत्वापार्थोभ्यभाषत कर्णंभ्रातृसमूहस्य
मध्येचलमिवस्थितं १७ अर्जुनउवाच अनाहूतोपसृष्टानामनाहूतोपजल्पिनां येलोकास्तान्हतःकर्णमयात्वंप्रतिपत्स्य
से १८ कर्णउवाच रंगोयंसर्वसामान्यःकिमत्रतवफाल्गुन वीर्यश्रेष्ठाश्चराजानोबलंधर्मोनुवर्तते १९ किंक्षेपैर्दुर्बला
श्वासैःशरैःकथयभारत गुरोःसमक्षंयावत्तेहराम्यद्यशिरःशरैः २० वैशंम ततोद्रोणाभ्यनुज्ञातःपार्थःपरपुरंजयः भ्रातृ
भिस्त्वरयाश्लिष्टोरणायोपजगामतं २१ ततोदुर्योधनेनापिसभ्रात्रासमरोद्यतः परिष्वक्तःस्थितःकर्णःप्रगृह्यसशरंधनुः २२
ततःसविद्युत्स्तनितैःसेंद्रायुधपुरोगमैः आवृतंगगनंमेघैर्बलाकापंक्तिहासिभिः २३ ततःस्नेहाद्धरिहयंदृष्ट्वारंगावलोकिनं
भास्करोप्यनयन्नाशंसमीपोपगतान्घनान २४ मेघच्छायोपगूढस्तुततोदृश्यतफाल्गुनः सूर्यातपपरिक्षिप्तःकर्णोपिसम

७६४

आ०
२४६

दृश्यत २५ धार्त्तराष्ट्राग्रतः कर्णस्तस्मिन्देशे व्यवस्थिताः भारद्वाजः कृपो भीष्मो यतः पार्थस्ततो भवत् २६ द्विधा रंगः समभवत्स्त्री
णां द्वैधमजायत कुंतिभोजसुता मोहं विज्ञातार्था जगाम ह २७ तां तथा मोहमापन्नां विदुरः सर्वधर्मवित् कुंतीमाश्वासयामा
स प्रेष्याभिश्चंदनोदकैः २८ ततः प्रत्यागतप्राणा तावुभौ परिदंशितौ पुत्रौ दृष्ट्वा सुसंभ्रांता नान्वपद्यत किंचन २९ तावुद्यतमहा
चापौ कृपः शारद्वतोब्रवीत् द्वंद्वसमाचारे कुशलः सर्वधर्मवित् ३० अयं पृथायास्तनयः कनीयान्पांडुनंदनः कौरवो भवता सा
र्द्धं [illegible] द्वंद्वयुद्धं करिष्यति ३१ त्वमप्येवं महाबाहो मातरं पितरं [illegible] कुले कथयस्व नरेंद्राणां येषां त्वं कुलभूषणः ३२ ततो विदित्वा
पार्थस्त्वां प्रतियोत्स्यति वा न वा वृथाकुलसमाचारैर्न युध्यंते नृपात्मजाः ३३ वैशंपायन उवाच एवमुक्तस्य कर्णस्य व्रीडावनतमाननं बभौ
वर्षांबुविक्लिन्नं पद्ममागलितं यथा ३४ दुर्योधन उवाच आचार्य त्रिविधा योनी राज्ञां शास्त्रविनिश्चये सत्कुलीनश्च शूरश्च सेनां प्र
कर्षति ३५ यद्ययं फाल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति तस्मादेषोंगविषये मया राज्येभिषिच्यते ३६ वैशंपायन [illegible] ततस्तस्मिन्
क्षणे कर्णः सलाजकुसुमैर्घटैः कांचनैः कांचने पीठे मंत्रविद्भिर्महारथः अभिषिक्तोंगराज्ये स श्रिया युक्तो महाबलः ३७ सच्छ
त्रवालव्यजं जयशब्दोत्तरेण च उवाच कौरवं राजा वचनं स वृषस्तदा ३८ अस्य राज्यप्रदानस्य सदृशं किं ददानि ते प्रब्रूहि राजशार्दू
ल कर्त्ता ह्यस्मि तथा नृप ३९

भोज १ कर्णस्य ५

२२८४

आ०
२४६

अ॰ एपस्त्रदर्शनेध्यायः ततः ॥ ॥ छ ॥ छ ॥ छ ॥

अ ४ रा॰ श्री ३

अप्यंतं सख्यमिच्छामीत्याह तंसस्तुयोधनः एवमुक्तस्ततः कर्णस्तथेतिप्रत्युवाचतं सर्वांश्चोभौसमाश्लिष्यपरांमुदमवापतुः ४० इत्यादिपर्वएपस्त्रदर्शने वैशंपायनउवाच ततःस्रस्तोत्तरपटः सप्रस्वेदः सवेपथुः विवेशाधिरथो रंगं यष्टिप्राणोह्वयन्निव १ तमालोक्य धनुस्त्यक्त्वा पितृगौरवयंत्रितः कर्णोभिषेकार्द्रशिराः शिरसा समवंदत २ ततः पादाववच्छाद्य पटांतेन ससंभ्रमः पुत्रेति परिपूर्णार्थमब्रवीद्रथसारथिः ३ परिष्वज्य च तस्याथ मूर्धानं स्नेहविक्लवः अंगराज्याभिषेकार्द्रमश्रुभिः सिषिचे पुनः ४ तं दृष्ट्वा सूतपुत्रोयमितिसंचिंत्य पांडवः भीमसेनस्तदा वाक्यमब्रवीत्प्रहसन्निव ५ नत्वमर्हसि पार्थेन सूतपुत्ररणे वधं कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया ६ अंगराज्यं च नार्हस्त्वमुपभोक्तुं नराधम श्वा हुताशसमीपस्थं पुरोडाशमिवाध्वरे ७ एवमुक्तस्ततः कर्णः किंचित्प्रस्फुरिताधरः गगनस्थं विनिःश्वस्य दिवाकरमुदैक्षत ८ ततो दुर्योधनः कोपादुत्पपात महाबलः भ्रातृपद्मवनात्तस्मान्मदोत्कट इव द्विपः ९ सोब्रवीद्भीमकर्माणं भीमसेनमवस्थितं वृकोदर तैवयुक्तं वचनं वक्तुमीदृशं १० क्षत्रियाणां बलं ज्येष्ठं योद्धव्यं क्षत्रबंधुना शूराणां च नदीनां च दुर्विदाः प्रभवाः किल ११ सलिलादुत्थितो वह्निर्येन व्याप्तं चराचरं दधीचस्यास्थितो वज्रं कृतं दानवसूदनं आग्नेयः कृत्तिकापुत्रो रौद्रो गांगेय इत्यपि श्रूयते भगवान्देवः सर्व[illegible]गुह्यमयो गुहः क्षत्रियेभ्यश्च ये जाता ब्राह्मणास्ते च ते श्रुताः विश्वामित्रप्रभृतयः प्राप्ता ब्रह्मत्वमव्ययं १४ आचार्यः कलशाज्जातो द्रोणः शस्त्रभृतां वरः गौतमस्यान्ववाये च शरस्तंबाच्च गौतमः भवतां च यथा जन्म तदप्यागमितं मया १५ ॥ छ ॥ छ ॥ छ

अ॰ २ (margin, left)

कावृत्य (margin, right)

१७ यस्य येन क्रांतं तेंसो स्मत्समन्तं कार्मुकं पादेन स्य छा ग्रस्त ध्यतां वा पातु अस्मा न्वाहं तत्प्रतिकृत्य प्रसिद्धां प्रतिज्ञां करोतीत्यर्थः १८ २४ सचापि कर्णोपि

सकुंडलं सकवचं सर्वलक्षणलक्षितं कथमादित्यसदृशं मत्तो व्याघ्रं जनिष्यति १६ पृथिवीराज्यमहीयं नागराज्यं नरेश्वरः अनेन बाहुवीर्येण मया त्वाहानुवर्तिना १७ यस्य वामनुजस्येदं तन्न्न्नां तमधिचेष्ठितं रथमाहत्य पद्मासविनामयत कार्मुकं १८ ततः सर्वस्य रंगस्य हाहाकारो महानभूत साधुवादानुसंबद्धः सूर्यश्चास्तमुपागमत १९ ततो दुर्योधनः कर्णमालंब्याग्रकरे नृपः दीपिकाग्निकृतालोकस्तस्माद्रंगाद्विनिर्ययौ २० पांडवाश्च सद्रोणाः सकृपाश्च विशांपते भीष्मेण सहिताः सर्वे ययुः स्वंस्वं निवेशनं २१ अर्जुनेति जनः कश्चित्कश्चित्कर्णेति भारत कश्चिद्दुर्योधनेत्येवं ब्रुवंतः प्रस्थितास्तदा २२ कुंत्याश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितं पुत्रमंगेश्वरं स्नेहाच्छन्ना प्रीतिरजायत २३ दुर्योधनस्यापि तदा कर्णमासाद्य पार्थिव भयमर्जुनसंजातं क्षिप्रमंतरधीयत २४ सचापि वीरः कृतशस्त्रनिःश्रमः परेण साम्नाभ्यभवत्सुयोधनं युधिष्ठिरस्याभवत्तदा मतिर्न कर्णात्प्रत्योस्ति धनुर्द्धरः क्षितौ २५ इत्यादिपर्वणि अस्त्रदर्शने वैशंपायन उवाच पांडवान्धार्तराष्ट्रांश्च कृतास्त्रान्प्रसमीक्ष्य सः गुर्वर्थं दक्षिणाकाले प्राप्तेमन्यत वै गुरुः १ ततः शिष्यान्समानीय आचार्यार्थमचोदयत द्रोणः सर्वानशेषेण दक्षिणार्थं महीपते २ पांचालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि पर्यानयत भद्रं वः सा स्यात्परमदक्षिणा ३ तथेत्युक्त्वा तु ते सर्वे रथैस्तूर्णं प्रहारिणः आचार्यधनदानार्थं द्रोणेन सहिताययुः

निःश्रमः नितरां श्रमः २५ अध्यायः पांडवानां श्रमत्यत चिंतितवान् १ अर्थं गुरवे देयं दक्षिणार्थं दक्षिणायै २ ३ ४ ॥ ७ ॥ ॥

८ ततोमहानिर्गमनाद्दृर्ष्वमार्गेवृतसन्नाहोभूत ८ तेप्रणेदुःपत्तसेनमालस्येतिशेषः ९ ११ कुर्याम कुर्वीमहि २२ २९ ॥ ७ ॥ ७ ॥ ॥

ततोभिजग्मुःपांचालान्निघ्नंतस्तेनरर्षभाः ममृदुस्तस्यनगरंद्रुपदस्यमहौजसः ५ दुर्योधनश्चकर्णश्चयुयुत्सुश्चमहाबलः दुःशासनोविकर्णश्चजलसंधःसुलोचनः ६ एतेचान्येचबहवःकुमाराबहुविक्रमाः अहंपूर्वमहंपूर्वमित्येवंक्षत्रियर्षभाः ७ ततोवररथारूढाःकुमाराःसादिभिःसह प्रविश्यनगरंसर्वेराजमार्गमुपाययुः ८ तस्मिन्कालेतुपांचालःश्रुत्वादृष्ट्वामहद्बलं भ्रातृभिःसहितोराजंस्त्वरयानिर्ययौगृहात ततस्तुकृतसन्नाहोयज्ञसेनोमहीधरः शरवर्षाणिमुंचंतःप्रणेदुःसर्वएवते ९ ततोरथेनशुभ्रेणसमासाद्यतुकौरवान यज्ञसेनःशरान्घोरान्ववर्षयुधिदुर्जयः वैशं पूर्वमेवतुसंमंत्र्यपार्थोद्रोणमथाब्रवीत दर्पोद्रेकात्कुमाराणामाचार्यंद्विजसत्तमं ११ एषांपराक्रमस्यांतेवयंकुर्वीमसाहसं एतैरशक्यःपांचालोग्रहीतुंरणमूर्द्धनि १२ एवमुक्त्वातुकौंतेयोभ्रातृभिःसहितोनघ अर्द्धक्रोशेतुनगरादतिष्ठद्बहिरेवसः १३ द्रुपदःकौरवान्दृष्ट्वाप्राधावतसमंततः शरजालेनमहतामोहयन्कौरवींचमूं १४ तमुद्यतंरथेनैकमाशुकारिणमाहवे अनेकमिवसंत्रासान्मेनिरेतत्रकौरवाः १५ द्रुपदस्यशराघोराविचेरुःसर्वतोदिशं ततःशंखाश्चभेर्यश्चमृदंगाश्चसहस्रशः प्रावाद्यंतमहाराजपांचालानांनिवेशने १६ सिंहनादश्चसंजज्ञेपांचालानांमहात्मनां धनुर्ज्यातलशब्दश्चसंस्पृश्यगगनंमहान १७ दुर्योधनोविकर्णश्चसुबाहुर्दीर्घलोचनः दुःशासनश्चसंक्रुद्धाःशरवर्षैरवाकिरन १८ सोतिविद्धोमहेष्वासः

९२ न४ पार्श्वतोयुधिदुर्जयः

७५
तुमुलं समुपस्थितं श्रुत्वा चारमुखात् ततस्तु दृष्ट्वा कौरवा नेव तिष्ठेदन्न द्रवंतीति च अपि तु द्रवंत्येव पांडवान् प्रतीत्यर्थः तथा न नदंती वेत्यापि ज्ञेयं २२ २३ २४

आ०
२५८

वधमत्ता स्वनीकानि तत्क्षणादेव भारत १९ दुर्योधनं विकर्णं च कर्णं चापि महाबलं नानानपसुता न्वीरान्सैन्यानि विविधानि च अलातचक्रवत्सर्वं चरन्द्रोणोरतर्प्पयत २० ततस्तु नागराः सर्वे मुसलैर्यष्टिभिस्तदा अभ्यवर्षत कौरव्यान वर्षमाणाघना इव २१ स बाल वृद्धास्ते पौराः कौरवानभ्यपुस्तदा श्रुत्वा तु तुमुलं युद्धं कौरवानेव भारत द्रवंति स्म नदंति स्म [illegible] क्रोशंतः पांडवान्प्रति २२ पांडवास्तु स्वनं श्रुत्वा आर्त्तानां लोमहर्षणं अभिवाद्य ततो द्रोणं रथानारुरुहुस्तदा २३ युधिष्ठिरं निवार्याशु मा युध्यस्वेति पांडवं माद्रेयौ चक्ररक्षौ तु फाल्गुनस्य तदाकरोत २४ सेनाग्रगो भीमसेनः सदाभूद्गदया सह तदा शत्रुस्वनं श्रुत्वा भ्रातृभिः सहितोनघः आपाजुवेन कौंतेयो रथेनानादयन् दिशः २५ पांचालानां ततः सेनामुद्धूतार्णवनिःस्वनां भीमसेनो महाबाहुर्दंडपाणिरिवांतकः प्रविवेश म[illegible] हासेनां मकरः सागरं यथा २६ स्वयमभ्यद्रवद्भीमो नागानीकं गदाधरः स युद्धकुशलः पार्थो बाहुवीर्येणातुलः अहनत्कुंजरानीकं गदया कालरूपधृक् २७ ते गजा गिरिसंकाशाः क्षरंतो रुधिरं बहु भीमसेनस्य गदया भिन्नमस्तकपिंडकाः २८ पतंति द्विरदा भूमौ वज्रघाता दिवाचलाः गजानश्वान्रथांश्चैव पातयामास पांडवः पदातींश्च रथांश्चैव न्यवधीदर्जुनाग्रजः २९ गोपाल इव दंडेन यथा पशुगणान्वने चालयन्रथनागाश्च संचचाल वृकोदरः ३० वैशंपायन उवाच भारद्वाजप्रियं कर्तुमुद्यतः फाल्गुनस्तदा पार्थतं शरजालेन क्षिपन्नागात्स पांडवः ३१ रथयोधांश्च गजयोधांश्च संमं ततः [illegible] पातयन्समरे राजन्युगांताग्निरिव ज्वलन् ३२ ततस्ते हन्यमाना वै पांचालाः संजयास्तथा शरैर्नानाविधैस्तूर्णं पार्थं सेव्याघ सर्वशः सिंहनादमुखैः कृत्वा समयुध्यंत पांडवं ३३ तत्र युद्धमभवद्घोरं सुमहाद्भुतदर्शनं

पथा ४

सौधं ३

एम०
२५८

सिंहनादस्वनंकृत्वानामृष्यत्याकशासनिः ३४ ततःकिरीटीसहसापांचालान्समरेद्रवत छादयन्निषुजालेनमहतामोह
यन्निव ३५ शीघ्रमभ्यस्यतोवाणान्संदधानस्यचानिशं नांतरंददृशेकिंचित्कौंतेयस्ययशस्विनः ३६ सिंहनादस्वसंजज्ञेसा
धुशब्देनमिश्रितः ततःपांचालराजस्तथासत्यजिन्महारथ त्वरमाणोभिदुद्राववमहेंद्रंशंवरोयथा ३७ महताशरवर्षेणपा
र्थःपांचालमावृणोत ततोहलहलाशब्दआसीत्पांचालकेवले जिघृक्षतिमहासिंहोगजानामिवयूथपं ३९ दृष्ट्वापार्थेनत
ट्यां तंसत्यजित्सत्यविक्रमः पांचालंवैपरिप्रेप्सुर्द्धनंजयमुपाद्रवत ४० ततस्त्वर्जुनपांचालौयुद्धायसमुपागतौ व्यक्षोभ
येतांतौसैन्यमिंद्रवैरोचनाविव ४१ ततःसत्यजितंपार्थोदशभिर्मर्मभेदिभिः विव्याधबलवत्क्रुद्धंतदद्भुतमिवाभवत ४२ तत
शरशतैःपार्थंपांचालःशीघ्रमर्दयत पार्थस्तुशरवर्षेणछाद्यमानोमहारथः ४३ वेगंचक्रेमहावेगोधनुर्ज्यामवमृज्यच ततःसत्य
जितश्चापंछित्वाराजानमभ्ययात ४४ अथान्यद्धनुरादायसत्यजिद्वेगवत्तरं साश्वंससूतंसरथंपार्थंविव्याधसत्वरः ४५ सतेनम
मृषेपार्थःपांचालेनार्दितोयुधि ततस्तस्यविनाशार्थंसत्वरंव्यसृजच्छरान हयानध्वजं धनुर्मुष्टिमुभौतौपार्ष्णिसारथी ४६ सत
थाभिद्यमानेषुकार्मुकेषुपुनःपुनः हयेषुविनियुक्तेषुविमुखोभवदाहवे ४७ ससत्यजितमालोक्यतथाविमुखमाहवे वेगेन
महताराजन्नभ्यवर्षतपांडवं ४८

४९ ततश्छिन्नधनुः ततः उत्सृज्य चापं शरावरं तु गांधारात्सनं तमुद्दिश्य खड्गमुत्कृष्य सिंहनादमकरोदिति संबंधः ५० ईषारथस्य युगचक्रयोः संलग्नमराद

आ०
२४९

तदा चक्रे महद्युद्धमर्जुनो जयतां वरः तस्य पार्थो धनुश्छित्वा ध्वजं चोर्व्यामपातयत पंचभिस्तस्य विव्याध हयान्सूतं च सायकैः ४९
तत उत्सृज्य तच्चापमाददानं शरावरं खड्गमुत्कृष्य कौंतेयः सिंहनादमथाकरोत ५० पांचालस्य रथस्येषामाप्लुत्य सहसापतत पा
चालरथमास्थाय अवित्रस्तो धनंजयः विक्षोभ्यांभोनिधिं पार्थस्तं नागमिव सोऽग्रहीत ५२ ततस्तु सर्वपांचाला विद्रवंति दिशो द
श दर्शयन्सर्वसैन्यानां स बाह्वोर्बलमात्मनः सिंहनादस्वनं कृत्वा निर्जगाम धनंजयः ५३ आयांतमर्जुनं दृष्ट्वा कुमाराः सहितास्त
दा ममर्दुस्तस्य नगरं द्रुपदस्य महात्मनः ५५ अर्जुन उवाच संबंधी कुरुवीराणां द्रुपदो राजसत्तमः मा वधीस्तद्बलं भीमगुरु
दानं प्रदीयताम ५६ वैशंपायन उवाच भीमसेनस्तदा राजन्नर्जुनेन निवारितः अतृप्तो युद्धधर्मेषु न्यवर्तत महाबलः ५७
ते यज्ञसेनं द्रुपदं गृहीत्वा रणमूर्द्धनि उपाजह्रुः सहामात्यं द्रोणाय भरतर्षभ ५८ भग्नदर्पं हृतधनं तं तथा वशमागतं स वै
रं मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत ५९ विमृद्य तरसा राष्ट्रं पुरं ते मृदितं मया प्राप्य जीवं रिपुवशं सखिपूर्वं किमिष्यते ६० एवमुक्त्वा
प्रहस्येदं किंचित्स पुनरब्रवीत मा भैः प्राणभयाद्वीर क्षमिणो ब्राह्मणा वयं ६१ आश्रमे क्रीडितं यत्तु त्वया बाल्ये मया
सह तेन संवर्द्धितः स्नेहः प्रीतिश्च क्षत्रियर्षभ ६२ प्रार्थयेयं त्वया सख्यं पुनरेव जनाधिप वरं ददामि ते राजन्राज्यस्यार्द्ध ६३
मवाप्नुहि ६३ अराजा किल नो राज्ञः सखा भवितुमर्हसि अतः प्रयतितं राज्ये यज्ञसेन मया तव ६४ राजासि दक्षिणे

लो० ३ ५ कूले भागीरथ्याहमुत्तरे सखायं मां विजानीहि पांचाल यदि मन्यसे ६५

स्त०
२४६

रु ५१ ५२ ५३ ६४ ६५ ॥ छ ॥ छ ॥ ॥ छ ॥ छ ॥ २३७५

लोतिष्ठे २

७१ अध्यायः ततः संवत्सरस्यांत इत्यादि १ धृतिः प्रजानां धारणां स्थैर्यं अचापलं सहिष्णुत्वं तितिक्षा समाहार द्वंद्वो पंचम्यानृशंस्यं अनैष्ठुर्यं आर्जवमवक्रता
एतेभ्यो हेतुभ्यः प्रजानामनुकंपार्थं धृतराष्ट्रेणापांडुपुत्रो यौ वराज्याय स्थापित इति द्वयोः संबंधः २ अदीर्घदर्शीत्वं विनयादिः सदाचारः हृत्तं शौर्यं तेजआदि

थपाह १ नदी ३

द्रुपद उवाच अनाश्चर्यमिदं ब्रह्मन विक्रांतेषु महात्मसु प्रीये त्वयाहं प्रीतिं च त्वत्तोभिशामि शाश्वतीं ६६ वैशंपायन उवाच एवमुक्तः
स तं द्रोणो मोक्षयामास भारत सत्कृत्य चैनं प्रीतात्मा राज्यार्द्धं प्रत्यपादयत ६७ माकंदीमथ गंगायास्तीरे जनपदायुतां सो
ध्यावसद्दीनमनाः कांपिल्यं च पुरोत्तमं दक्षिणांश्चापि पांचालान्यावच्चर्मण्वती ६८ द्रोणेन चैव द्रुपदः परिभूयाथ पालितः क्षा
त्रेण च बलेनास्य नापश्यत्स पराजयं ६९ हीनं विदित्वा चात्मानं ब्राह्मणस्य बलेन तु पुत्रजन्म परीप्सन्वै पृथिवीमनुसंसरत ७०
अहिच्छत्रं च विषयं द्रोणः समभिपद्यत एवं राजन्नहिच्छत्रा पुरी जनपदायुता युधि निर्जित्य पार्थेन द्रोणाय प्रतिपादिता ७१ इत्या
दिपर्वण्यस्त्रदर्शनं वैशंपायन उवाच ततः संवत्सरस्यांते यौवराज्याय पार्थिव स्थापितो धृतराष्ट्रेण पांडुपुत्रो युधिष्ठिरः १ धृ
तिस्थैर्यसहिष्णुत्वादानृशंस्यात्तथार्जवात भृत्यानामनुकंपाच्च तथैव स्थिरसौहृदात २ ततो दीर्घेण कालेन कुंतीपुत्रो युधि न ७
ष्ठिरः पितुरंतर्दधे कीर्तिं शीलवृत्तसमाधिभिः ३ असियुद्धे गदायुद्धे रथयुद्धे च पांडवः संकर्षणादशिक्षद्वै शश्वच्छिक्षां वृको
दरः ४ समाप्तशिक्षो भीमस्तु द्युमत्सेनसमो बले पराक्रमेण संपन्नो भ्रातृणामचरद्वशे ५ प्रगाढदृढमुष्टित्वे लाघवे
वेधने तथा क्षुरनाराचभल्लानां विपाठानां च भारत ऋजुवक्रविशालानां प्रयोक्ता फाल्गुनोभवत ६ ॥ ७ ॥

मत्वा विधरणां समाधिः प्रजानां समाधानं ३ ४ ५ क्षुरनाराचौ पार्श्वधारती क्ष्णाग्रौ भल्लं वडिशवदुद्धरणकाले अंत्राण्युद्धरतीति वक्रः विपा
टो विशालः वैशाखी मुखवत ६

७ गुडाकानिद्रा तस्या ईशमर्जुनं जितनिद्रं ८ तीर्थात्पात्रांतरं गमयितुं संप्रदायाविच्छेदार्थमित्यर्थः ९ अल्पवीर्येषु अमानुषेषु १० त्वयाग्राह्यन्मामोचय
ताप्राप्तंप्रा गेवासमयो विद्यालाभानंतरं गुरवे दक्षिणादानं ११ १३ उत्तरामुत्तरस्यां दिशि उपदेशं प्राप्यात प्राप्तवानाचरणावुपसंगृह्याचार्यात ब्रह्मशिरोऽस्त्रं

६३

लाघवे सौष्ठवे चैव नान्यः कश्चन विद्यते बीभत्सुसदृशो लोके इति द्रोणो व्यवस्थितः ७ ततोऽब्रवीद्गुडाकेशं द्रोणः कौरवसंसदि अगस्त्यस्य धनुर्वेदे शिष्यो मम गुरुः पुरा अग्निवेश्य इति ख्यातस्तस्य शिष्योऽस्मि भारत ८ तीर्थात्तीर्थं गमयितुमहमेतत्समुद्यतः तपसा यन्मया प्राप्तममोघमशनिप्रभं अस्त्रं ब्रह्मशिरो नाम यद्दहेत्पृथिवीमपि ९ ददता गुरुणा चोक्तं न मनुष्येष्विदं त्वया भारद्वाज विमोक्तव्यमल्पवीर्येष्वपि प्रभो १० त्वया प्राप्तमिदं वीर दिव्यं नान्योऽर्हति त्विदं समयस्तु त्वया रक्ष्यो मुनिसृष्टो विशांपते ११ आचार्यदक्षिणां देहि ज्ञातिग्रामस्य पश्यतः ददानीति प्रतिज्ञाते फाल्गुनेनाब्रवीद्गुरुः १२ युद्धेऽहं प्रतियोद्धव्यो युध्यमानस्त्वयानघ तथेति च प्रतिज्ञाय द्रोणाय कुरुपुंगवः उपसंगृह्य चरणौ स प्रायादुत्तरां दिशं १३ स्वभावादगमच्छब्दो महीं सागरमेखलां अर्जुनस्य समो लोके नास्ति कश्चिद्धनुर्धरः १४ गदायुद्धेऽसियुद्धे च रथयुद्धे च पांडवः पारगश्च धनुर्युद्धे बभूवाथ धनंजयः १५ नीतिमान्सकलां नीतिं विबुधाधिपतेस्तदा अवाप्य सहदेवोऽपि भ्रातॄणां ववृते वशे १६ द्रोणेनैव विनीतश्च भ्रातॄणां नकुलः प्रियः चित्रयोधी समाख्यातो बभूवातिरथोदितः १७ त्रिवर्षकृतयज्ञस्तु गंधर्वाणामुपप्लवे अर्जुनप्रमुखैः पार्थैः सौवीरः समरे हतः १८ न शशाक वशे कर्तुं यं पांडुरपि वीर्यवान् सोऽर्जुनेन वशं नीतो राजासीद्यवनाधिपः १९ ॥ ७ ॥

६३

लब्धवानित्यर्थः १३ १४ विबुधाधिपतेर्देवाचार्यात् द्रोणात्कृपात् १५ १६ विनीतः शिक्षितः अतिरथेषु उदितः अतिरथेषु उदितः ख्यातः १७ त्रिवर्षेति गंधर्वोपप्लवे विपत्स्य सौवीरस्य यज्ञो न विस्तृत इत्युपयोग्यत्वमुक्तं १९

आ० २५०

ए० २५०

शस्त्रैः सहितः शस्त्रहिंसायां २० २३ बलधुर्वर्द्धितवंतः २४ २५ अध्याये ॥ उद्रिक्तान् अधिकान् १ राजशास्त्रं दंडनीतिशास्त्रं २ उत्सिक्ताः उत्कर्षेण सर्वत्र व्या
प्ताः षंजसंगोस्य रूपं अस्त्ये गुरावत्वे पिद्ये षवत्वेन पश्यामि तेभ्य इति चतुष्पातिषु कोपादेव पश्यामि न तत्त्वानाद्विति गम्यते क्रुद्धः उहेति स्मरणात पांडवैः सह संधिकारणं वा तयो

अतीवबलसंपन्नः सदामानी कुरून्प्रति विपुलोनाम सौवीरः शस्तः पार्थेन धीमता २० दत्तामित्र इति ख्यातं संग्रामे कृतनिश्चयं सुमित्रं
नाम सौवीरमर्जुनो दमयच्छरैः २१ भीमसेनसहायश्च रथानामयुतं च सः अर्जुनः समरे प्राच्यान्सर्वानेकरथोजयत् २२ तथैवैक
रथो गत्वा दक्षिणामजयद्दिशं धनौघं प्रापयामास कुरुराष्ट्रं धनंजयः २३ एवं सर्वे महात्मानः पांडवा मनुजोत्तमाः परराष्ट्राणि निर्जि
त्य स्वराष्ट्रं ववृधुः पुरा २४ ततो बलमतिख्यातं विज्ञाय दृढधन्विनां दूषितः सहसा भावो धृतराष्ट्रस्य पांडुषु २५ स चिंतापरमो
राजा न निद्रामलभन्निशि २५ इत्यादिपर्वणि वैशंपायन उवाच श्रुत्वा पांडुसुतान्वीरान्बलोद्रिक्तान्महौजसः धृतराष्ट्रो
महीपालश्चिंतामगमदातुरः १ तत आहूय मंत्रज्ञं राजशास्त्रार्थवित्तमं कणिकं मंत्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः २
धृतराष्ट्र उवाच उत्सिक्ताः पांडवा नित्यं तेभ्योऽसूये द्विजोत्तम तत्र मे निश्चिततमं संधिविग्रहकारणम् कणिक त्वं समा
चक्ष्व करिष्ये वचनं तव ३ वैशंपायन उवाच स प्रसन्नमनास्तेन परिपृष्टो द्विजोत्तमः उवाच वचनं तीक्ष्णं राजशास्त्रार्थ
दर्शनं ४ शृणु राजन्निदं तत्र प्रोच्यमानं मयानघ न मेऽभ्यसूया कर्तव्या श्रुत्वैतत्कुरुसत्तम ५ ॥ ७ ॥ ७ ॥ ॥

रन्यतरप्रयोजकं संधिविग्रहकारणं तन्मे समाचक्ष्व ३ ४ ब्राह्मणोपि तीक्ष्णमेवोपायं वदतीति प्रसक्ताभ्यसूयां वारयति न मे इति ५ ॥ ७ ॥ ७ ॥

ति २ मलर्व ३ वि २

भीमसेनदुर्योधनयोरर्जुनकर्णयोश्च वैरस्याचिकित्स्यत्वादसंभावनीयं संधिं त्यक्त्वा विग्रहमेवाश्रित्याह नित्यमिति उद्यतो न तु द्विष्टो दंडो येन स तथा अपरुषा
न भीषयेदेव न तु छिंद्यात् न वा उपद्रवेत् तैर्भाव्यः समेषु नित्यं विवृतं यो नयो पौरुषः स्यात् समानं तु लघं वलं संपाद्य हन्यादेवेत्यर्थः उक्तं चैषु अच्छिद्रः स्यात् स्वस्य न्यूनं
कोशबलादिकं ते यथा न जानंति तथा स्थेयं छिद्रदर्शी पराणां स्वमति हृष्टरदेशावस्थितत्वादीनि छिद्राणि तद्दर्शी स्यात् तथा भृत्याचतेरवैरमनुसृत्य शत्रुं हन्या
दित्याह परेषां विवरानुग इति ६ अस्य श्लोकस्याद्यपादं व्याचष्टे नित्यमिति ७ तस्यैवोत्तरार्द्धं व्याचष्टे नास्येति अंगानि सहायसाधनोपायादीनि गूहेत् सं

आ० २५१

दं १

नित्यमुद्यतदंडः स्यान्नित्यं विवृतपौरुषः अच्छिद्रश्छिद्रदर्शी स्यात्परेषां विवरानुगः ६ नित्यमुद्यतदंडाद्धि भृशमुद्विजते जनः त
स्मात्सर्वाणि कार्याणि दंडेनैव विधारयेत् ७ नास्य छिद्रं परः पश्येच्छिद्रेण परमन्वियात् गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्म
नः ८ नासम्यक्कृतकारी स्यादुपक्रम्य कदाचन कंटको ह्यपि दुश्छिन्न आस्रावं जनयेच्चिरं ९ वधमेव प्रशंसंति शत्रूणाम
पकारिणां सुविदीर्णं सुविक्रांतं सुयुद्धं सुपलायितं आपद्यापदि काले च कुर्वीत न विचारयेत् १० ॥ छ ॥ ॥ छ ॥

प १

रक्षेद्यात् तथा चैनमगणय न शत्रु छिद्रैर्रेवांगैः प्रहर्तव्य इति भावः आत्मनो विवरं रंध्रं तु रक्षेत ८ तथा स्वल्पं सम्यक्कार्यं अकृत्वा नष्टं तं निष्पादितं कार्यं तेनाक
रणशीलः स्यात् शत्रुशेषं नावशेषयेदित्यर्थः तत्र दृष्टांतः कंटके इति दुश्छिन्न अर्द्धच्छिन्नः आस्रावं व्रणं ९ उपसंहरति वधमिति कथं वधः कर्त
व्य इत्याह सुविदीर्णमिति सुविक्रांतमपि शत्रुं काले आपदि आपत्त्रे आलक्ष्य सुविदीर्णं विनष्टं कुर्वीत तथा सुयुद्धमपि शत्रुं आपदि काले सुपलायितं
कुर्वीत यस्य च भावेन भावलक्षणमिति सप्तमी आपदा शत्रोर्विदारणकाले लब्धे णीपइत्यर्थः आपदि आपदीति द्वित्वं [illegible] परो शत्रोर आपत्तदा नैव तत्र क
र्तव्यं न तु अनुबंधादिकं सैन्यमात्रादिकं वा विचारयेत् सार्द्धश्लोकः १०

राम० २५१

पं ३

मध्यमं प्रत्येवमुक्त्वा ऽधमो विनोपेक्षणीयऽ इत्याह नावज्ञेयेति आश्रयो दुर्गादिः इधनं आगतेः तस्य संश्रयात् बलात् ११ आश्रयाभावे तु स किं कुर्यात्तत्राह अंधऽइति स
हि अंधवेलायां आत्मो अंधं तदिति मिरेक्ती वेश्यति मेदिनी सामर्थ्यं प्रतिघातसमर्थे अंधः हीनोपकरणः स्यात् भवेत् शक्नोत् अन्यकाशत्रुं शरणामेती त्यर्थः वाधिर्यमपिचा
श्रयेतानि दानीधिकृतो पिश्रुत्वन्तवहेवतन् लत्वाक्रमेत अर्थं शत्रुं चापंतरामन्तरा व्यवन्तिः प्रयोजनं कुर्यात् स्वन्नधर्मेत्यकाशत्रु गृहे भिदाभु गपिसाद्दित्यर्थः न
तु सिद्धस्तर्हि पुरुषार्थे इति चेत्तत्राह शयीत मृगशायिकां मृगरुः शय्यां शयीत शेते यथा व्याधो मृगान्विश्वासयितुं मृषानिर्गित्य तेषु च ते सुप्रलर
ति एवं हन्तुमेवाकारं गोपयती त्यर्थः १२ उपसंहरति सांत्वेति तु तस्मात् तमेव कपटेन वशोच्छितं तस्य पवि सांत्वादिना विश्वास्य हन्यादेवेत्यर्थः १३ बलाधिकमु

इति

अ॰प॰ १

नावज्ञेयो रिपुस्तावत् दुर्बलोपि कथंचन अल्पोप्यग्निर्वनं हन्ति स्त्रोनेदत्तो आश्रयात् ११ अंधः स्याद्वधवेलायां वाधिर्यमपि चाश्रयेत् कु
र्यात्तृणमपंचापं शयीत मृगशायिकां १२ सांत्वादिभिरुपायैस्तु हन्याच्छत्रुं वशे स्थितं दयानतस्मिन् [illegible] कर्तव्या शरणागत
[illegible] इत्युत १३ निरुद्विग्नो रिपुर्भवति न रुताजायते भयं हन्यात्ममित्रं दानेन तथा पूर्वोपकारिणां १४ हन्यात्त्रींस्त्वं च सप्तेति परपक्ष
स्य सर्वशः मूलमेवादितश्छिद्यात्परपक्षस्य नित्यशः ततः सहायाः सत्वद्वा न सर्वं इच्छिन्नदनंतरं १५ ॥ ७ ॥ ७ ॥

द्विष्याह हन्यादिति अमित्रं सह तशत्रुं दायादं दानेन तत्परिचारकान्व शीलस्य विषाद्युपायैर्हन्यात तथा संप्रतिदासमन्तमपि पूर्वोपकारिणां हन्यादे
वेत्युक्तं भवति १४ तत्रोपायमाह हन्यादिति परपक्षस्य कुम्भान् त्रीन् ऐश्वर्यमंत्रोत्साहान ऐश्वर्यं तदाय दुर्गाघात्रं मंत्रं चारैः उत्साहमाप्रभुत्वतेजो वधे
न तथा पंचेते त्वयापो वराज्यो ऽनुशनीया इति भावः तथा पंच अमात्य राष्ट्र दुर्गाणि कोशो दंडश्च पंचमः इति प्रकृतिपंचकहननेन शत्रोरैश्वर्यमंशो भवती
त्यर्थः दंडोत्र सैन्यं साम्नादानेन भेदेन दंडेन इधनेन वा विषेण वह्निना वापि प्रहेतीः पंच निरस्य दित्याह संप्रेति उद्धनं प्रमत्तस्य पाशेन मारणं यद्वा उद्बंधनादिना
मूलं शत्रुमेव नाशयेत् अन्यथा न तावत् लादि नाशात् कृपाभेदपित्वा विषादिना नाशयेत् किमितरै रित्याह मूलमेवेति १५ ॥ ७ ॥ ७ ॥ ॥

मू॰श्लो॰ २४

१६ एकाग्रः एकः शत्रुर्वेरस्य ग्राः ६ षि गोवा येयस्यतादृशः स्यात् अन्यत्र मनो न दध्यात् [illegible] मनो न दध्यात् अविक्लतो गुप्तांगः विवरदर्शकः परछिद्रद्रष्टेत्यर्थः
नित्योद्विग्नः विश्वासं हित्वा यः कश्चिदपि निश्चितो न भवेदित्यर्थः दर्शक इति क्रियायां क्रियार्थायां राघुल १७ दंभादिनापि शत्रुर्जेय इत्याह अग्राधानेनेति १८ अ
कुश [illegible] वत्पर विरलाकर्षणं शोचमग्राधानादि [illegible] अत्रेष्टातः आनाम्येति अनामयित्वा एतत्प्रयोजनमाह फलार्थ इति फलं शत्रुवधः प्रसिद्धं च १९ से

अंकुर ६१ पक्षं ३

छिन्नमूलेष्वधिष्ठाने सर्वे तज्जाश्च विनो हताः कथं नु शाखास्तिष्ठेरंश्छिन्नमूले वनस्पतौ १६ एकाग्रः स्यादविक्लतो नित्यं विवरदर्शकः
राजन्नेवं सपत्नेषु नित्योद्विग्नः समाचरेत् १७ अग्राधानेन यत्ने न काषायेन जटाजिनैः लोकान्विश्वासयित्वैव ततो लुंपेद्यथा
वृकः १८ अंकुशं शौचमित्याहुरर्थानामुपधारणे आनाम्य फलितां शाखां पक्वं प्रशातयेत् फलार्थोऽयं समारंभो लोके पुं
सां विपश्चितां १९ वहेदमित्रं स्कंधेन यावत्कालस्य पर्ययः ततः प्रत्यागते काले भिंद्याद्घटमिवाश्मनि २० अमित्रो न वि
मोक्तव्यः कृपणं बह्वपि ब्रुवन् कृपा न तस्मिन्कर्तव्या हन्यादेवापकारिणं २१ हन्यादमित्रं सांत्वेन तथा दानेन वा पुनः तथैव भेददंडाभ्यां सर्वो
पायैः प्रशातयेत् २२ धृतराष्ट्र उवाच कथं सांत्वेन दानेन भेदैर्दंडेन वा पुनः अमित्रः शक्यते हंतुं तन्मे ब्रूहि यथा तथं २३
कणिक उवाच शृणु राजन्यथा वृत्तं वने निवसतः [illegible] पुरा जंबुकस्य महाराज नीतिशास्त्रार्थदर्शिनः २४ अथ क
श्चित्कृतप्रज्ञः शृगालः स्वार्थपंडितः सखिभिर्न्यवसत्सार्धं व्याघ्राखुवृकबभ्रुभिः २५ तेऽपश्यन्विपिने तस्मिन्बलिनं मृगयूथपं
अशक्ता ग्रहणे तस्य ततो मंत्रममंत्रयन् २६

वयानिर्दयत्वेन शत्रुं हन्यादित्याह वहेदिति द्वाभ्यां २० २४ वभ्रुर्नकुलः मृगपूगस्य यूथपं महांतं हरिणं २६ ॥ छ ॥ छ ॥ छ ॥ ॥

मूषिकेणाश्वाऽऽशुघद्धितैः २६ ३३ मृगराजस्य व्याघ्रस्य ३४ ३८ गर्जरवद्दुःपचं व्याघ्रामिषलाभात् ३९ ४२ वलंपनं गात्रसंकोचनं वर्त्मांतरेण

जंबुक उवाच असकृद्यततो येषघ्रस्तं व्याघ्रवने त्वया पुत्रवद्वैजवसंपन्नो बुद्धिशालीनशक्यते २७ मूषिकोस्य शयानस्य चरणौ भ
क्षयतां अर्थे नमद्दितैः पादैर्व्याघ्रो गमृत्वातु वै ततः २८ ततो वै भक्षयिष्यामः सर्वे मुदितमानसाः जंबुकस्य तु तद्वाक्यं तथा चक्रुः
समाहिताः १९ मूषिकाभक्षितैः पादैर्मृगं व्याघ्रोवधीत्तदा २९ दृष्ट्वैव वेष्टमानं तु भूमौ मृगकलेवरं स्नात्वागच्छत भद्रं वो रक्षा
मी त्याह जंबुकः ३० शृगालवचनात्तेपि गताः सर्वे नदीं ततः स चिंतापरमो भूत्वा तस्थौ तत्रैव जंबुकः ३१ अथ्यागमत् पूर्वं तु
स्नात्वा व्याघ्रो महाबलः ददर्श जंबुकं चैव चिंताकुलितमानसं ३२ व्याघ्र उवाच किं शोचसि महाप्राज्ञ त्वं नो बुद्धिमतां वरः
अशित्वा पिशितान्यद्य विहरिष्यामहे वयं ३३ जंबुक उवाच शृणु मे त्वं महाबाहो यद्वाक्यं मूषिकोब्रवीत् धिग्बलं मृ
गराजस्य मयाद्योपं मृगो हतः ३४ मद्बाहुबलमाश्रित्य तृप्तिमद्य गमिष्यति गर्जमानस्य तस्यैव मत्तो भक्ष्यं न रोचये ३५
व्याघ्र उवाच ब्रवीति यदि स ह्येवं कालेद्य स्मि प्रबोधितः स्वबाहुबलमाश्रित्य हनिष्ये [illegible] हं वनेचरान् ३६ जंबुक उवाच
खादिष्ये तत्र मांसानि इत्युक्त्वा प्रस्थितो वनं एतस्मिन्नेव काले [illegible] तु मूषिको प्याजगाम ह तमागतमभिप्रेक्ष्य सृगालो
प्य[illegible] ब्रवीद्वचः ३८ जंबुक उवाच शृणु मूषिक भद्रं ते नकुलो यदिहाब्रवीत् मृगमांसं न खादेयं गरमेतन्न रोचते ३९
मूषिकं भक्षयिष्यामि तद्भवाननुमन्यतां तच्छ्रुत्वा मूषिको वाक्यं संत्रस्तः प्रगतो बिले ४० ततः स्नात्वा स वै तत्र आजगाम
वृको नृप तमागतमिदं वाक्यमब्रवीज्जंबुकस्तदा ४१ मृगराजो हि संक्रुद्धो न ते साधु भविष्यति सकलत्रस्त्विहायाति कुरुष्व य
दनंतरं ४२ एवं संचोदितस्तेन जंबुकेन तदा वृकः ततो वलुंपनं कृत्वा प्रयातः पिशिताशनः ४३ ॥ ७ ॥ ७ ॥

गमनमित्यर्थः ४३

४८ भयेनेति अत्र व्याघ्रस्य सामन्ता आखुकपयोर्व्याघ्राद्भयप्रदर्शनेन नकुलस्य ओजसा स्वसामर्थ्येन च बुद्धिभेदः ५४ हन्तव्या इति पाठेपि एतेन व्याहत एव वार्थः ५५ हिंसायामि त्यस्य रूपं भृतिवर्द्धन इति पाठे भृतिवृद्धः ५० उभौ जिगीषुः तत्र उपायतत्पर्यन्तो चेत्प्रधावान यो मृदुः कार्यदक्षवान स वर्द्धते अहादर्शे च कांक्षायामिति मेदिनी ५१

एतस्मिन्नेव काले तु नकुलोऽभ्याजगाम ह तमुवाच महाराज नकुलं जंबुको वने ५४ स्वबाहुबलमाश्रित्य निर्जितास्ते पतोगता मम दत्वा तु युद्धं त्वं भुंक्ष्व मांसं यथेप्सितं ५५ नकुल उवाच मृगराजो वृकश्चैव बुद्धिमानपि मूषकः निर्जिता यत्त्वया वीरास्तस्माद्वीरतरो भवान् ५६ न त्वयाप्युत्सहे योद्धुमित्युक्त्वा सोप्युपागमत् ५६ कणिक उवाच एवं तेषु प्रयातेषु जंबुको हृष्टमानसः खादति स्म तदा मांसमेकः संमंत्र्य निश्चयात् एवं समाचरन्नित्यं सुखमेधेत भूपतिः ५८ भयेन भेदयेद्भीरुं शूरमंजलिकर्मणा लुब्धमर्थप्रदानेन समं न्यूनं तथौजसा ५९ एवं ते कथितं राजञ्छृणु चाप्यपरं तथा पुत्रः सखा वा भ्राता वा पिता वा [illegible] पदि वा गुरुः रिपुस्थानेषु वर्त्तंतः कर्त्तव्या भूतिवर्द्धनाः शपथेनाप्यरिं हन्यात् अर्थदानेन वा पुनः ५० विषेणा मायया वापि नोपेक्षेत कथंचन उभौ चेत्संशयोपेतौ श्रद्धावांस्तत्र वर्द्धते ५१ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनं ५२ क्रुद्धोप्यक्रुद्धरूपः स्यात्स्मितपूर्वाभिभाषिता न चाप्यन्यमपध्वंसेत्कदाचित्कोपसंयुतः ५३ प्रहरिष्यन्प्रियं ब्रूयात्प्रहरन्नपि भारत प्रहृत्य च कृपायीत शोचेत च रुदेत च ५४ आश्वासयेच्चापि परं सांत्वधर्मार्थवृत्तिभिः अथास्य प्रहरेत्काले यदा विचलिते पथि ५५ अपि घोरापराधस्य धर्ममाश्रित्य तिष्ठतः स हि प्रच्छाद्यते दोषः शैलो मेघैरिवासितैः ५६

ननु ज्येष्ठाय विधिः कथं हंतव्य इत्याशंक्याह गुरोरिति अवलिप्तस्य अन्याय्यबलेन गर्वितस्य राज्यं पांडोर्न्यायसमं तमित्यजानतो राज्यलुब्धस्य शासनं कार्यं ५२ अपध्वंसेत् कुत्सयेत ५३ ५४ अस्य एनं विचलिते विचलने सति ५५ ५६ ॥ ५७॥ ५८ ॥ ॥ ॥

अनुप्राप्तवधः शीघ्रं हन्तुमिष्टः चौरादिः अधनाः दरिद्राः संतो नास्तिकाः परलोकश्च येषां ईदृशाः तान् चौरान् एवं धर्मे पक्षपातं प्रदर्शयेदित्याशयः ५७ प्र
तिविश्रब्धघाती अत्यंतविश्रब्धहननशीलः तीक्ष्णदंष्ट्रो निमग्नकः गाढं प्रहर्ता यथा पुनर्नोन्मज्जेदित्यर्थः ५८ योन्यं हंतुमिच्छति तेनान्योपि तिर्यासती
ति स्वयमशंकितेभ्यः शंकेत ५९ सर्वत्र शंकावतः किमपि कार्यं न सिध्यतीत्याशंक्याह नेति ६० सुविहितः सम्यक्परीक्षितः ६१ उद्यानादिस्थाने

पा १ स्थविरजनसवे १

पः स्यात् अनुप्राप्तवधस्तस्यागारं प्रदीपयेत् अधनास्तिकांश्चोरान्विषयेत् ५७ प्रत्युत्थानासनाद्येन संप्रश्नेनेन केन चित्
प्रतिविश्रब्धघाती स्यात्तीक्ष्णदंष्ट्रो निमग्नकः ५८ अशंकितेभ्यः शंकेत शंकितेभ्यश्च सर्वशः अशंकाद्भयमुत्पन्नमपि
मूलानि कृंतति ५९ न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृंतति ६० चारः
सुविहितः कार्य आत्मनश्च परस्य वा पाखंडांस्तापसादींश्च परराष्ट्रेषु योजयेत् ६१ उद्यानेषु विहारेषु देवतायतनेषु च पा
नागारेषु रथ्यासु सर्वतीर्थेषु चाप्यथ चत्वरेषु च कूपेषु पर्वतेषु वनेषु च समवायेषु सर्वेषु सरित्सु च विचारयेत् ६३ वाचाम
पि विनीतः स्याद्धृदयेन तथा क्षुरः स्मितपूर्वाभिभाषी स्यात् सृष्टो रौद्रेण कर्मणा ६४ अंजलिं शपथं सांत्वं शिरसा पाद

सं २ श्व ३ वंदनं आशाकरणमित्येवं कर्तव्यं भूतिमिच्छता ६५

पुष्पे समवायाः जनसमूहास्तेषु [illegible] तीर्थेषु मंत्री पुरोहितश्चैव युवराजश्च भूपतिः पंचमो द्वारपालश्च षष्ठोंतर्वंशिकस्तथा कारागाराधि
कारी च द्रव्यसंचयकृत्तथा कृत्याकृत्येषु चार्थानां नवमो विनियोजकः प्रदेष्टा नगराध्यक्षः कार्यनिर्माणकृत्तथा धर्माध्यक्षः सभाध्यक्षो दंडपाल
स्त्रिपंचमः षोडशो दुर्गपालश्च तथा राष्ट्रांतपालकः अटवीपालकांतानि तीर्थान्यष्टादशैव तु इति नीतिशास्त्रोक्तेषु विचारयेत् चारद्वारा शत्रुवि
कीर्षितुमिति शेषः ६२ ६४ आशाकरणं तुभ्यं धनादिकं दास्य इत्यपि प्रलोभनं भूतिमिच्छता भूतिकामस्यैवैतदुचितं न परलोककामस्ये
पा २ त्यर्थः ६५

आ०
२५४

अस्मिन्नर्थे नीतिशास्त्रीयं वृक्षरूपकमाह सपुष्पित इति पुष्पितः शब्देनैव फलाशां दर्शयेत् तद् फलं दर्शितं स्यात् प्राप्तावधि धर्मं प्रयोजयेत् प्राप्तमप्यप्राप्तवत् आमः पक्व इव भूत्वा तिष्ठेत् न च जीर्येत धनव्ययेन शत्रून् पोषयित्वा हापयेत् ६६ एवं नानोपायैः शत्रूणां दण्डमुक्त्वा नीतिमाह त्रिवर्ग इति त्रिवर्गे धर्मार्थकामेषु त्रिविधा त्रिप्रकारा पीडा एकैकेन प्रकारेण पीड्यते इत्यर्थः तथा अनुपश्चाद् बध्यते इत्यनुबन्धः फलं तदपि तथैव त्रिविधं शुभं पीडास्तु नश्यमाः त्रिवर्गपरस्परापीडया सेवेतेत्यर्थः ६७ तत्र पीडामाह धर्ममिति धर्ममतं तं विचरतः पुंसः द्वाभ्यामर्थकामाभ्यां धनव्ययब्रह्मचर्यपद्धतिभ्यां पीडा चिन्त्यैकत्वं भवति सापि

सपुष्पितः स्यादफलः फलवान्स्याद्दुरारुहः आमः स्यात्पक्वसंकाशो न च जीर्येत कर्हिचित् ४६ त्रिवर्गे त्रिविधा पीडा ह्यनुबन्धस्तथैव च अनुबन्धाः शुभा ज्ञेयाः पीडास्तु परिवर्जयेत् ६७ धर्मं विचरतः पीडा स्यापि द्वाभ्यां नियच्छति अर्थं स्यार्थलुब्धस्य कालस्येति प्रवर्त्तिनः ६८ अगर्वितात्मा युक्तश्च सान्त्वयुक्तो नसूयितो अवेक्षितार्थः शुद्धात्मा मन्त्रपीत द्विजैः सह ६९ कर्मणा येन तेनैव मृदुना दारुणेन च उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ७० न संशयमनारुह्य नरो भद्राणि पश्यति संशयं पुनरारुह्य यदि जीवति पश्यति ४७

सर्पोध२

एम०
२५४

पुंसः पीडा धर्मं नियच्छति निगृह्णाति कर्तुः पीडेव धर्मपीडेत्यर्थः अर्थं चाप्यर्थलुब्धस्य कामं चाति प्रवर्त्तिन इति व्याख्येयं लुब्धस्यार्थं विचरतः पुं सः द्वाभ्यां काम धर्माभ्यां पीडिताभ्यां पीडा भवति सापि पीडार्थं नियच्छति एवमतिप्रवर्त्तिनः कामं विचरतः पुंसो द्वाभ्यां धर्मार्थाभ्यां पीडा भवति सा पीडा कामं नियच्छतीति योज्यं अर्थस्य कामस्येति पाठे कर्मणि षष्ठ्यौ ६८ ६९ समर्थो धर्ममाचरेदित्यनेन न एवौकं सर्वकोशत्यादिकं आ पद्येव कार्यं नान्यथेत्युक्तं ७० संशयं प्राणसंकटं ७१ ७१

दि ना १

परिभवेनशोकेनतमतीतेननलरालाघाख्यानेन अनागतेनकालांतरेतवश्रेयोभविष्यतीत्याशाप्रदर्शनेन पंडितंप्रत्युत्पन्नेनवर्त्तमानेनधर्मांसांत्वयेत १२ संक्षिप्
स्कंनिरुणद्धियोरिरोति १३ मंत्रेतिपरचारेभ्योमंत्रस्यसंरक्षणेनआकारस्यक्रोधाद्यावेशस्यचसंरक्षणेनकर्त्तव्यस्यपंचधाप्रधानस्यादित्यर्थः १४ इंद्रस्यैवप्राधा
न्यंप्राहनाछित्वेति १५ विग्रहकालमाहकर्षितमितिअघासकमनाहार १६ नार्थिकइतिसंगतंसख्यंकार्येषुसावशेषेषुकार्पिणाःस्ववशेतिष्ठे[illegible]

सह दना १

यस्यबुद्धिःपरिभवेनमतीतेनसांत्वयेत् अनागतेनदुर्बुद्धिंप्रत्युत्पन्नेनपंडितं १२ योरिणांसहसोपश्यतीतंकृत्यवत्
सवृक्षाग्रेयथासुप्तः पतितःप्रतिबुध्यते १३ मंत्रसंवरणेयत्नःसदाकार्योनसूपता आकारमभिरक्षेत्तचारेणा
श्लो ४ प्यनुपालितः १४ नाछित्वापरमर्माणिनाकृत्वाकर्मदारुणं नाहत्वामत्स्यघातीवप्राप्नोतिमहतींश्रियं १५ कर्षि
तं[illegible]धितंक्लिन्नमपानीयमघासकं परिविश्वस्तंमंदंचप्रहर्त्तव्यमरेर्बलं १६ नार्थिकोर्थिनमभ्येति कृतार्थेनमभ्येति
कृतार्थेनास्तिसंगतं तस्मात्सर्वाणिसाध्यानिसावशेषाणिकारयेत् १७ संग्रहेविग्रहेचैवयत्नःकार्योनसूपता उत्सा
हश्चापियत्नेनकर्त्तव्योमहतीमिच्छता १८ नास्यकृत्यानिबुध्येरन्मित्राणिरिपवस्तथा आरब्धान्येवपश्येरन्सुपर्यवसि
तान्यपि १९ भीतवत्संविधातव्यंयावद्भयमनागतं आगतंतुभयंदृष्ट्वाप्रहर्त्तव्यमभीतवत् २० दंडेनोपनतंश
त्रुमनुगृह्णातियोनरः समृत्युमुपगृह्णातिगर्भमश्वतरीयथा २१ अनागतंहिबुध्येतयच्चकार्यंपुरःस्थितं नतुबुद्धि
क्षयात्किंचिदतिक्रामेत्प्रयोजनं २२

नारायंतेअन्यथानारायंतेत्यर्थः १७ संग्रहेसहायादीनांविग्रहेरिपुभिःसार्द्धं १८ १९ संविधातव्यंप्रतिकर्त्तव्यं २० दंडेनोपनतंवशीकृतंअनुगृह्णातिधन
मानादिना अश्वतरीअश्वागर्दभसंकीर्णजातिः २१ अनागतंकार्यंबुध्येतबुध्येचतदनुयगुणाकुर्यादित्यर्थः पुरःस्थितंवर्त्तमानंबुद्धिक्षयादनवधारणात् २२

श्री०
२५५

देशाद्यनुगुणाउत्साहोपि कर्त्तव्यः न तु लसो भवेत् दैवं प्राक्तनं कर्म पंधर्मादयस्त्रयः तेषां प्रविभज्य ८३ तेषाममध्ये नैश्रेयसौ श्रेयो हेतुरुपलक्षितनिश्चयः ८४ बालः स्वल्पोपि ८५
आत्मानं संधुक्षयति संहाय्यादिना वर्द्धयति संचयमिंधनानां पक्षे शत्रूणां ८६ आशां कालवतीं दध्यादित्यत्र प्राक् दर्शितात्या आशा तत्व नदान्तमाशामेव प्रदापयेदित्यर्थः पूर्वं

नैःश्रेयसौ तु तौ ज्ञेयौ देशकालावितिस्थितिः
उत्साहश्चापि यत्नेन कर्त्तव्यो भूतिमिच्छता विभज्य देशकालौ च दैवं धर्मादयस्त्रयः ८३
ताल्वृन्तकं तेन मूले बालः शत्रुरुपेक्षितः गहने शिशिरो वातः स्वल्पोऽपि संजायते महान् ८५ अग्निस्तोकमिवात्मानं संधुक्ष
८४ तालवृन्तकं तेन मूले बालः शत्रुरुपेक्षितः ... आशां कालवतीं कुर्यात्कालं विघ्नेन योजयेत् विघ्नं निमित्ततो ब्रूयात्
यति यो नरः स वर्द्धमानो ग्रसते महान्तमपि संचयं ८६ आशां कालवतीं कुर्यात्कालं विघ्नेन योजयेत् विघ्नं निमित्ततो ब्रूयात्
निमित्तं वापि हेतुतः कोरामृत्वा हरेत्प्राणान्निशितः कालसाधनः प्रतिच्छन्नो लोमहारो द्विषतां परिकर्त्तनः ८८ पांडवेषु
यथान्यायमन्येषु च कुरूद्वह वर्त्तमानो न मज्जेस्त्वं तथा कृत्यं समाचर ८९ सर्वकल्याणसंपन्नो विशिष्ट इति निश्चयः त
स्मात्त्वं पांडुपुत्रेभ्यो रक्षात्मानं नराधिप ९० भ्रातृव्या बलिनो यस्मात्पांडुपुत्रा नराधिप पश्चात्तापो यथा न स्या
त्तथा नीतिर्विधीयतां ९१ वैशंपायन उवाच एवमुक्त्वा संप्रतस्थे कणिकः स्वगृहं ततः धृतराष्ट्रोपि कौरव्यः
शोकार्त्तः समपद्यत ९२ इत्यादिपर्वणि कणिकवाक्यं ॥ ५४ ॥ छ ॥

तिं कालवतीं दीर्घावधिमतीं निमित्ततः हेतुतः तमपि हेत्वंतरेण ८७ क्रूरः क्रूरवत्तिशितस्तीक्ष्णः निर्दयः अतिपातवत्पक्षे शाणोल्लीढः कालसाधनः छिद्रकालापेक्षः पक्षे
कालस्तो हो पादानकः प्रतिच्छन्नः पक्षे चर्मपुटच्छन्नः लोमहारी अनुलोमसंज्ञाहो पक्षे लोमच्छेदकः लोमहारीति पाठेपि तावेवार्थो ८८ ८९ कल्या
णोर्धनपुत्रराज्यादिभिः संपन्नः विशिष्टः कुलशीलबलादिभिः श्रेष्ठः ९० ९२

राम०
२५५

वैशंपायन ततः १ अनुज्ञाप्य दत्त्वा २ इंगितं चेष्टितं तेन भावं चित्ताभिप्रायं जानातीति इंगितज्ञः भावज्ञः आकारेण च नेत्रादिविकारेण यथाह नेत्रवक्त्रविकारेण ज्ञायतेऽन्तर्गतं मन इति। विदितवेद्यत्वात् तत्त्वज्ञ आत्मा चित्तं यस्य ४ यंत्रं महत्स्वपि वातेषु जले आशये नौकास्तंभकं तोयंत्रं तालमयं सामुद्रिकप्रसिद्धं एवंभूतां नावं तीनौ ची उनावेगे

वैशंपायन उ० ततः सुबलपुत्रस्तु राजा दुर्योधनश्च ह। दुःशासनश्च कर्णश्च दुष्टमंत्रममंत्रयन् १ ते कौरव्यमनुज्ञाप्य धृतराष्ट्रं नराधिपं। दहने तु सपुत्रायाः कुंत्या बुद्धिमकारयन् २ तेषामिंगितभावज्ञो विदुरस्तत्त्वदर्शिवान्। आकारेण च तं मंत्रं बुबुधे दुष्टचेतसां ३ ततो विदितवेद्यात्मा पांडवानां हिते रतः। पलायने मतिं चक्रे कुंत्याः पुत्रैः सहानघ ४ ततो वातसहां नावं यंत्रयुक्तां पताकिनीं। ऊर्मिक्षमां दृढां कृत्वा कुंतीमिदमुवाच ह ५ एष जातः कुलस्यास्य कीर्तिवंशप्रणाशनः। धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतं ६ इयं वारिपथे युक्ता तरंगपवनक्षमा। नौर्यया मृत्युपाशात्त्वं सपुत्रा मोक्ष्यसे शुभे ७ तच्छ्रुत्वा व्यथिता कुंती पुत्रैः सह यशस्विनी। नावमारुह्य गंगायां प्रययौ भरतर्षभ ८ ततो विदुरवाक्येन नावं विक्षिप्य पांडवाः। धनं चादाय तेऽरण्यमरिष्टं प्राविशन्वनं ९ निषादी यं च पुत्रानु जातुषे तत्र वेश्मनि कारणाभ्यागता दग्धा सह पुत्रैरनागसा १० स च म्लेच्छाधमः पापो दग्धस्तत्र पुरोचनः। वंचिताश्च दुरात्मानो धार्तराष्ट्राः सहानुगाः ११ अविज्ञाता महात्मानो जनानामक्षतास्तथा। जनन्या सह कौंतेया मुक्ता विदुरमंत्रिताः १२ ततस्तस्मिन्पुरे लोका नगरे वारणावते। दृष्ट्वा जतुगृहं दग्धमन्वशोचन्त दुःखिताः १३ प्रेषयामासुः राजाने यथा वृत्तं निवेदितुं १४

न ऊर्मिभिः दरियितुं शक्यमतः ऊर्मिक्षमां पताकिनीं मरुन्मिरुमाभिति ५ परीतात्मा विपरीतबुद्धिः परिणामे ममताक्रांत आत्मा चित्तं यस्येति वा ६ ७ नावमारुह्य अपथा वितीर्य जतुगृहे स्वदाहो मा भूदिति बिलमार्गेण वारणावतं त्यक्त्वा गंगातीरं प्राप्य अनंतरं ८ अरिष्टं निर्विघ्नं ९ । १४

अरिष्टं

क्रूरेणाकर्णिकेनैवसंहितेऽपरिपंथे १९ प्राणाधिकंवलाधिकं २० २१ यथयागतंपथ्योपस्थितंतत्तथैवप्रतिचक्रुः २२ राज्यप्राप्तिंराज्यभोग्यतां २४ प्रज्ञाचक्षुरंधः अतएवा

संवृत्तस्तेमहाकामःपांडवान्प्रवासयन् सकामोमभवत्कौरव्यभुक्त्वाराज्यंसपुत्रकः २५ तच्छ्रुत्वाधृतराष्ट्रस्तुसहपुत्रेणशोचयन् प्रेमकार्याणिचक्रेचाच
कारसहवांधवैः पांडवानांतथ्याक्तंताभीष्मश्चकुरुसत्तम १६ जनमेजयउ च पुनर्विस्तरशःश्रोतुमिच्छामिद्विजसत्तम दाहंजतुगृहस्यैवपांडवा
नांचमोक्षणं १७ सुनृशंसमिदंकर्मतेषांक्रूरोपसंहितं कीर्तयस्वयथावृत्तंपरंकौतूहलंमम १८ वैशंपायनउवाच शृणुविस्तरशो
राजन्वदतोमेपरंतप दाहंजतुगृहस्यैतत्पांडवानांचमोक्षणं १९ प्राणाधिकंभीमसेनंकृतविद्यंधनंजयं दुर्योधनोलक्षयित्वापर्यप्यत
प्यतदुर्मनाः २० ततोवैकर्तनःकर्णःशकुनिश्चापिसौवलः अनेकैरभ्युपायैस्तेजिघांसंतिस्मपांडवान् २० पांडवाश्चापितत्सर्वंप्रतिच ॥
क्रुर्यथागतं उद्भावनमकुर्वंतोविदुरस्यमतेस्थिताः २२ गुणैःसमुदितान्दृष्ट्वापौराःपांडुसुतांस्तदा कथयांचक्रिरेतेषांगुणान्संस ॥
त्सुभारत २३ राज्यप्राप्तिंचसंप्राप्तंज्येष्ठंपांडुसुतंतदा कथयंतिस्मसंभूयचत्वरेषुसभासुच २४ प्रज्ञाचक्षुरचक्षुष्ट्वाद्धृतराष्ट्रोजने
श्वरः राज्यंनप्राप्तवान्पूर्वंसकथंनृपतिर्भवेत् २५ तथाशांतनवोभीष्मःसत्यसंधोमहाव्रतः प्रत्याख्यायपुराराज्यंनसजातुग्रहीष्यति २६
तेवयंपांडवज्येष्ठंतरुणंवृद्धशीलिनं अभिषिंचामसाध्वद्यसत्यकारुण्यवेदिनं २७ सहिभीष्मंशांतनवंधृतराष्ट्रंचधर्मवित् सपु
त्रंविविधैर्भोगैर्योजयिष्यतिपूजयन् २८ तेषांदुर्योधनःश्रुत्वातानिवाक्यानिजल्पतां युधिष्ठिरानुरक्तानांपर्यतप्यतदुर्मतिः २९ सतप्यमानो
दुष्टात्मातेषांवाचोनचक्षमे ईर्ष्ययाचापिसंतप्तोधृतराष्ट्रमुपागमत् ३०

प ५

नधिकारात्राज्यंनप्राप्तवान्सइदानीमपिपुत्रद्वाराकथंनृपतिर्भवेत्नकथमपिद्वारलोपादित्यर्थः २५ २६ सत्यंकारुण्यंवेदवैश्वतद्वंतं २७ ३० ॥दै० ॥छ॥ दै०॥छ

विरहितमेकाकिनं ३२ आत्मानंचपरांचपीडामितिमिथ्येवोक्तं राज्ञःपांडवेषुद्वेषमुत्पादयितुं राज्यापहरणात्पीडां ३३ ज्येष्ठत्वात्प्राप्तमपि ३४ दायाद्यं दायादस्यपुत्रस्यभावोयौवराज्यंतस्यापी
उवस्य ३६ निरयंदुःखं ३७ भावितंवर्द्धितं ९ प्रधानतःप्राधान्येन अर्थवर्गः धनकोशामात्यसुहृत्सुमदधीनः ११ ॥ ❀ ॥ छ ॥ ❀ ॥ छ ॥ ❀ ॥ छ ॥ ❀

छ

ख ३

ततोविरहितंद्रस्वापितरंप्रतिपस्यसः पौरानुरागसंतप्तःप्रत्यादिदमभाषत ३१ श्रुतामेजल्पतांतातपौराणामशिवागिरः त्वामनादृत्यभीष्मंचपतिमिच्छंतिपांडवं म
तमेतच्चभीष्मस्यनचराज्यंबुभुक्षति अस्माकंतुपरांपीडांचिकीर्षंतिपुरेजनाः ३३ पितृतःप्राप्तवान्राजन्पांडुराज्यमगुणोपुरा त्वमप्यगुणसंयोगात्प्राप्तंराज्यंनलब्धवान्
३४ सएषपांडोर्दायाद्यंयदिप्राप्नोतिपांडवः तस्यपुत्रोध्रुवंप्राप्तस्तस्यतस्यापिचापरः ३५ तेवयंराजवंशेनहीनाःसहसुतैरपि अवज्ञाताभविष्यामोलोकस्यजगती
पते ३६ सततंनिरयंप्राप्ताःपरपिंडोपजीविनः नभवेमयथाराजंस्तथानीतिर्विधीयतां ३७ यदित्वंहिपुराराजन्निदंराज्यमवाप्तवान् ध्रुवंप्राप्स्यामचवयंराज्यमप्यव
शेजने ३८ इत्यादिपर्वणिजातुगृहे वैशंपायनउवाच एवंश्रुत्वातुपुत्रस्यप्रज्ञाचक्षुर्नराधिपः कणिकस्यचवाक्यानितानिश्रुत्वासमर्वशः धृतराष्ट्रोद्विधाचित्तःशो
कार्त्तःसमपद्यत १ दुर्योधनश्चकर्णश्चशकुनिःसौबलस्तथा दुःशासनचतुर्थास्तेमंत्रयामासुरेकतः २ ततोदुर्योधनोराजाधृतराष्ट्रमभाषत पांडवेभ्योभयं
नस्यात्तान्विवासयतांभवान् निपुणेनाभ्युपायेननगरंवारणावतं ३ धृतराष्ट्रस्तुपुत्रेणश्रुत्वावचनमीरितं मुहूर्त्तमिवसंचिंत्यदुर्योधनमथाब्रवीत्
४ धर्मनित्यःसदापांडुस्तथाधर्मपरायणः सर्वेषुतथामपित्वासीद्विशेषतः ५ नासौकिंचिद्विजानातिभोजनादिचिकीर्षितं निवेदयतिनित्यंहिममराज्यंधृतव्रतः सु
६ तस्यपुत्रोयथापांडुस्तथाधर्मपरायणः गुणवान्लोकविख्यातःपौरवाणांसुसंमतः सकथंशक्यतेस्माभिरपाकर्तुंबलादितः पितृपैतामहाद्राज्यात्सस
हायोविशेषतः ८ भृताहिपांडुनामात्याबलंचसततंभृतं भृताःपुत्राश्चपौत्राश्च तेषामपिविशेषतः तेपुरासत्कृतास्तातपांडुनानागरा
जनाः कथंयुधिष्ठिरस्यार्थेननोहन्युःसबांधवान् ९ दुर्योधनउवाच एवमेतन्मयातातभावितंदोषमात्मनः दृष्ट्वाप्रकृतयःसर्वाअर्थमानेनपूजिताः १०
ध्रुवमस्मत्सहायास्तेभविष्यंतिप्रधानतः अर्थवर्गःसहामात्योमत्संस्थोद्यमहीपते ११ सभवान्पांडवानाशुविवासयितुमर्हसि मृदुनैवाभ्युपायेन
नगरंवारणावतं यदाप्रतिष्ठितंराज्यंमयिराजन्भविष्यति तदाकुंतीसहापत्यापुनरेष्यतिभारत धृतराष्ट्रउ० दुर्योधनममाप्येतत्तद्धृदिसंपरिवर्त्तते
अभिप्रायस्यपापत्वान्नैवेतत्तुविवृणोम्यहं १३ नचभीष्मोनचद्रोणोनचक्षत्तानगौतमः विवास्यमानान्कौंतेयान्निच्छंत्यपकर्हिचित् समाहिकौरवे
याणांवयंतेचैवपुत्रक नैतेविषममिच्छेयुर्धर्मयुक्तामनस्विनः १५ ॥ ❀ ॥ छ ॥ ❀ ॥ छ ॥ ❀ ॥ छ ॥ ❀ ॥ छ ॥ ❀ ॥

छे २

म ३

ज्ञातिषु ८

ह१

आ०
२५१

सुविस्मयश्च निःशोकः २१ अध्यायः । ततो प्रकृतयः । प्रकृतीः संजहारेत्याधीनाश्च ते २ समाजः पशुपतेः एजार्थीमेलकः ५ जातकौतूहला । जातकौतुकदिदृक्षाः ६ ॥ ६४ ॥

नेवयं कौरवेयाणामेतेषां च महात्मनां कथं नवधतां ताता ह्यामज्जातं तथा १६ दुर्योधन उवाच मध्यस्थः सततं भीष्मो द्रोणपुत्रो मयि
स्थितः यतः पुत्रस्ततो द्रोणो भविता नात्र संशयः कृपः शारद्वतश्चैव यत एते ततो भवेत् द्रोणं च भागिनेयं च न स त्यक्ष्यति कर्हिचित्
१८ क्षत्ता र्थवद्धस्त्वस्माकं प्रच्छन्नं संयतः परैः न चैकः स समर्थोस्मान्पांडवार्थे प्रबाधितुं १९ सुविस्रब्धः पांडुपुत्रान्सह मात्रा प्रवा
सय वारणावतमद्यैव यथा यान्ति तथा कुरु २० विनिद्रकरणं घोरं हृदि शल्यमिवार्पितं शोकपावकमुद्भूतं कर्मणैतेन नाशय
२१ इत्यादिपर्वणि जतुगृहे वैशंपा॰ ततो दुर्योधनो राजा सर्वाः प्रकृतयः शनैः अर्थमानप्रदानाभ्यां संजहार सहानुजः १
धृतराष्ट्रप्रयुक्तास्ते केचित्कुशलमंत्रिणः कथयांचक्रिरे रम्यं नगरं वारणावतं २ अयं समाजः सुमहान्रमणीयतमो भुवि
उपस्थितः पशुपतेर्नगरे वारणावते ३ सर्वरत्नसमाकीर्णे पुंसां देशे मनोरमे इत्येवं धृतराष्ट्रस्य वचनाच्चक्रिरे कथा
४ कथ्यमाने तथा रम्ये नगरे वारणावते गमने पांडुपुत्राणां जज्ञे तत्र मतिर्नृप ५ यदा त्वमन्यत नृपो जातकौतूहला
इति उवाचैतानेत्य तदा पांडवानम्बिकासुतः ६

राम०
२५१

जातकौतूहलाः। जातकौतुकदिदृक्षाः ६७ सागणाः सपरिवाराः साचयाः अन्वयो वंशः सुकुंतीकाः इत्यर्थः सानुपात्रा इति पाठे पात्राम् अनुविधीयमानाः शिबिकाकोशाद्युपस्कर

सर्वरत्नसमाकीर्णं पुंसां देशे मनोरमे इत्येवं धृतराष्ट्रस्य वचनाच्चक्रिरे कथा ४ कथ्यमाने तथा रम्ये नगरे वारणावते गमने पांडुपुत्राणां जज्ञे तत्र म-
तिर्नृप ५ यदात्वमन्यत नृपो जातकौतूहला इति उवाचैतानथ राजा पांडवानंबिकासुतः ६ ममैते पुरुषा नित्यं कथयंति पुनः पुनः रमणी-
यतमं लोके नगरं वारणावतं ७ ते तात यदि मन्यध्वमुत्सवं वारणावते सगणाः सान्वयाश्चैव विहरध्वं यथामराः ८ ब्राह्मणेभ्यश्च रत्नानि गा-
यनेभ्यश्च सर्वशः प्रयच्छध्वं यथाकामं देवा इव सुवर्चसः ९ कंचित्कालं विहृत्यैवमनुभूय परां मुदं इदं वै हास्तिनपुरं सुखिनः पुनरेष्यथ १०
धृतराष्ट्रस्य तं काममनुबुध्य युधिष्ठिरः आत्मनश्चासहायत्वं तथेति प्रत्युवाच तं ११ ततो भीष्मं शांतनवं विदुरं च महामतिं द्रोणं च बाह्लिकं चैव
सोमदत्तं च कौरवं १२ कृपमाचार्यपुत्रं च भूरिश्रवसमेव च मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान् १३ पुरोहितांश्च पौरांश्च गांधारीं च य-
शस्विनीं युधिष्ठिरः शनैर्दीन उवाचेदं वचस्तदा १४ रमणीये जनाकीर्णे नगरे वारणावते सगणास्तत्र यास्यामो धृतराष्ट्रस्य शासनात् १५ प्रस-
न्नमनसः सर्वे पुण्या वाचो विमुंचत आशीर्भिर्वृंहितानस्मान्न पापं प्रसहिष्यते १६ एवमुक्तास्तु ते सर्वे पांडुपुत्रेण कौरवाः प्रसन्नवदना भूत्वा तेऽन्व-
वर्तंत पांडवान् १७ स्वस्त्यस्तु वः पथि सदा भूतेभ्यश्चैव सर्वशः मा च वोऽस्त्वशुभं किंचित्सर्वशः पांडुनंदनाः १८ ततः कृतस्वस्त्ययनो राज्यलंभाय पा-॥
र्थिवाः कृत्वा सर्वाणि कार्याणि प्रययुर्वारणावतं १९ इत्यादिपर्वणि जतुगृहे ॥ ॥ ॥ ॥

सहिताः ८ १५ प्रसहिष्यते सोढुं शक्नोति १६ १७ १८ राज्यलंभाय राज्यं लाभाय १९ अध्यायः ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥

एवं १ २ सत्वंतां नरीयां मदीयां च ३ विश्वासिकतरः। विश्वासेन प्राप्ततरः संधाय मिलित्वा ४ उद्धर [illegible] स्मलेप ५ ६ रासभेति तद्युक्तस्यावत्तरगन्तृगामी ७ महाधनं बहुधनसाध्यं

वैशंपायन उ च एवमुक्त्वा महाराज पांडुपुत्रेषु भारत दुर्योधनः परं हर्षमगच्छत्स दुरात्मवान् १ स पुरोचनमेकांतमानीय भरतर्षभ गृहीत्वा दक्षिणे पाणौ सचिवं वा
क्यमब्रवीत् २ ममेयं वसुसंपूर्णा पुरोचन वसुंधरा यथेयं मम तद्वत्ते स तां रक्षितुमर्हसि ३ नहि मे कश्चिदन्योस्ति विश्वासिकतरस्त्वया सहायो येन सं
धाय मंत्रयेयं यथा त्वया ४ संरक्ष तात मंत्रं च सपत्नांश्च ममोद्धर निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु ५ पांडवा धृतराष्ट्रेण प्रेषिता वारणावतं उत्स
वे विहरिष्यंति धृतराष्ट्रस्य शासनात् ६ स त्वं रासभयुक्तेन स्यंदनेनाशुगामिना वारणावतमद्यैव यथा यासि तथा कुरु ७ तत्र गत्वा चतुःशालं गृ
हं परमसंवृतं नागरोपांतमाश्रित्य कारयेथा महाधनं ८ शणसर्जरसादीनि यानि द्रव्याणि कानिचित् आग्नेयान्युत संतीह तानि तत्र प्रदापय
९ सर्पिषा तैलवसाभिश्च लाक्षया चाप्यनल्पया मृत्तिकां मिश्रयित्वा त्वं लेपं कुड्येषु दापय १० शणान् तैलं घृतं चैव जतु दारूणि चैव हि तस्मि
न्वेश्मनि सर्वाणि निक्षिपेथाः समंततः ११ यथा च तन्न पश्येरन् परीक्षंतोपि पांडवाः आग्नेयमिति तत्कार्यमपि चान्येपि मानवाः १२ वेश्मन्ये
वं कृते तत्र कृत्वा तान्परमार्चितान् वासयेथाः पांडवेयान् कुंतीं च ससुहृज्जनां १३ आसनानि च दिव्यानि यानानि शयनानि च विधातव्यानि पां
डूनां यथा तुष्येत वै पिता १४ यथा च तन्न जानंति नरा वारणावते तथा सर्वं विधातव्यं यावत्कालस्य पर्ययः १५ ज्ञात्वा च तान्सुविश्वस्तान् श
यानानकुतोभयान् अग्निस्त्वया ततो देयो द्वारतस्तस्य वेश्मनः १६ दह्यमाने स्वके गेहे दग्धा इति ततो जनाः न गर्हयेयुरस्मान्वै पांडवार्थाय
कर्हिचित् स तथेति प्रतिज्ञाय कौरवाय पुरोचनः प्रायाद्रासभयुक्तेन स्यंदनेनाशुगामिना स गत्वा त्वरितो राजा दुर्योधनमते स्थितः यथोक्तं
राजपुत्रेण सर्वं चक्रे पुरोचनः इत्यादि जतुगृहे ॥ ॥

८ आग्नेयानि अग्निसंदीपकानि ९ १३ पिता धृतराष्ट्रः १४ १५ अध्यायः ॥ ॥ ॥ ॥ ॥

पांडवा ३ प्रकृतयः प्रकृताः ४ अन्वयुः अनुजग्मुः ५ ९ अस्थाने अयुक्तं १० ११ गंता गमिष्यति १३ १८ पौरेषु निवृत्तेषु पांडवश्रेष्ठं युधिष्ठिरं बोधयन् अज्ञातं दुर्योधनकृतं

गी: २

वैशंपायन उ च पांडवास्तत्र्यानयुक्त्वा सह देवैर्निलोयमैः आरोहमाणा भीष्मसपादौ जगद्दुःखितवत् १ राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः अ
भिषश्चैव वृद्धानां कृपस्य विदुरस्य च २ एवं सर्वे निकुरुश्रेष्ठं नभिवाद्य पतत्रॆ॥ समालिंग्य समानानां बालैश्चाप्यभिवादिताः ३ सर्वा मातॄंस्तथापृच्छ्य कृत्वा
चैव प्रदक्षिणं सर्वाः प्रकृतयश्चैव प्रययुर्वीरा गावत ४ विदुरश्च महाप्राज्ञस्तथान्ये कुरुपुंगवाः पौराश्च पुरुषव्याघ्रानन्वयुः शोककर्षिताः ५ ततस्ते
वि दुर्वतिस्म प्राज्ञास्ता निर्भयास्तदा दीनान्दृष्ट्वा पांडुसुतानतीव भृशदुःखिताः ६ विषमं पश्यते राजा सर्वे या सुमंदधीः कौरव्यो धृतराष्ट्रस्तु नच धर्मं प्र
पश्यति ७ नहि पापमपापात्मा रोचयिष्यति पांडव भीमो वा बलिनां श्रेष्ठः कौंतेयो वा धनंजयः ८ कुतएव महात्मानौ माद्रीपुत्रौ करिष्यतः तांस्त्रा
ज्यं पितृतः प्राप्तान्धृतराष्ट्रो न मृष्यते ९ अधर्ममिदमत्यंतं कथं भीष्मोनुमन्यते विवास्यमानानस्थाने नगरे योभिमन्यते १० पितेव हि नृपोस्माक
मभूच्छांतनवः पुरा विचित्रवीर्यो राजर्षिः पांडुश्च कुरुनंदनः ॥११॥ सतस्मिन्पुरुषव्याघ्रे देवभावं गते सति राजपुत्रानिमान्बालान्धृतराष्ट्रो न मृष्यते १२
वयमेतदनिच्छंतः सर्वे एव पुरोत्तमान् गृहान्विहाय गच्छामो यत्र गंता युधिष्ठिरः १३ तांस्तथावादिनः पौरान्दुःखितान्दुःखकर्षितः उवाच मनसा ध्या
त्वा धर्मराजो युधिष्ठिरः १४ पिता मान्यो गुरुः श्रेष्ठो यदाह पृथिवीपतिः अशंकमानैस्तत्कार्यमस्माभिरिति नो व्रतं १५ भवंतः सुहृदोस्माकमस्मान्कृ
त्वा प्रदक्षिणं प्रतिनंद्य आशीर्भिर्निवर्तध्वं यथागृहं १६ यदा तु कार्यमस्माकं भवद्भिरुपपत्स्यते तदा करिष्यथास्माकं प्रियाणि च हितानि च १७
एवमुक्तास्ततः पौराः कृत्वा चापि प्रदक्षिणं आशीर्भिरभिनंद्यैताञ्जग्मुर्नगरमेव हि १८ पौरेषु विनिवृत्तेषु विदुरः सर्वधर्मवित् बोधयन्पां
डवश्रेष्ठमिदं वचनमब्रवीत् १९ ॥

कपटं ज्ञापयन्दुःखं वक्ष्यमाणं वचनं अब्रवीत् १९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

अ २

नकेवलं पौरेभ्य एव तद्वचनं गोपनीयमपि तु समीपस्थैरपि युधिष्ठिराद्यैर्न ज्ञातुं शक्यमित्याह प्राज्ञमिति प्राज्ञो बुद्धिमाननेकभाषाभिज्ञत्वात् । प्राज्ञत्वमेवाह प्राज्ञप्रलापज्ञ इ । ति प्रकर्षे
णाज्ञानां पृथग्भाषाणां वेदविरोधिनां म्लेच्छानां प्रलापोऽनर्थकं सम्यक् प्रकृतिप्रत्ययविभागेना निष्पन्नत्वाद्यथावद्बोधकं वचनं देशभाषारूपं तु सुवर्णात्वधिकवर्णा विकृतवर्णा च
पदज्ञातं पत्रतादृशम् नाभिज्ञाइत्यर्थः तत्र लुप्तवर्णाकाराद्धशतपथे इंद्रेणासुरा इति भवनाम यो इ माचि त्राख्या महीयां इ षका सुपधास्येति पदे ह पाहीत्यसुरवचनं तथा आ हा स्येद
सुरे आहीति प्रतिवचनं तत्र ह पद्यहा आदेहीति वक्तव्ये वर्णलोपः । अधिकवर्णा तु गौरितिवक्तव्ये गावी गोणी गोता गोपोतलिकेति प्रयुज्यते न यथा विकृतवर्णा तेऽसुरा हेलयो हे
लयो इति वदन्तः पराबभूवुरिति अपद्यत्रपि दृष्टेरेकस्यानेककाः प्रयुज्यते वेदेऽपि असुरभाषानुवादेऽतेनैयं शंका भयपान्तापरापि युधिष्ठिरं प्रति विदुरेणाह्लेच्छभाषया कृत या पिव्यो
मेनतत्संस्कृतेनैवोपनिबद्धमिति आदिपर्वणि नानादेशभाषाश्वव्यक्तइति प्रतिज्ञानात् । स एवं प्राज्ञः प्राज्ञप्रलापज्ञश्च विदुरो युधिष्ठिरं प्रज्ञलापत्तं म्लेच्छभाषाभिज्ञं वचइदं वक्ष्यमा

मत्तापकं १

प्राज्ञः प्राज्ञप्रलापज्ञः प्रलापज्ञमिदं वचः प्राज्ञं प्राज्ञः प्रलापज्ञं वचोऽब्रवीत् २० ॥ ॥ ॥ ॥

ह २

णं वचो म्लेच्छभाषारूपं प्राज्ञः प्रकर्षेणाज्ञानतः प्राज्ञं प्रकर्षेणाऽर्पितो ज्ञातुमशक्यं अज्ञापकं अर्थानामनवबोधकं वा कथं तर्हि तेन वचनेनास्यापि बोधो भविष्यतीत्याशंक्याह प्र
लापज्ञः प्रलापज्ञमिति प्र पंजानतः प्रलापज्ञापकं प्रलापज्ञमिति स्वबोधेऽशक्तो म्लेच्छभाषाभिज्ञत्वमुक्तं इह त्वर्थतः तदभिज्ञत्वमित्यपौनरुक्त्यं प्राज्ञ इति प्रलापज्ञ इति च द्वितीयं द्वि
वचनस्य षष्ठ्यन्तस्य रूपं प्राज्ञप्रलापज्ञमिति तु आत्मभावितज्ञाधातोः कर्मण्यात्मरूपेवचो वचनीयमवश्यं वक्तव्यमित्यर्थः अत एवाब्रवीत् अत्रोत्तरार्द्धे गौड पाठ पाठ एव ह श्यते तत्र द्वि
भावे तु दयाद्यार्देवापमर्थः प्रत्येतव्य सर्वथापि म्लेच्छभाषयोक्तो यो म्लेच्छभाषया विदुरेण युधिष्ठिरो बोधितो इत्येवतेनोक्तं स्यात् २० ॥ छ ॥ ॥ छ ॥

सा ३

म्लेच्छभाषयैव संगच्छते इति तात्पर्यं अन्यथा लोहमित्याद्यपि व्यासो नावद्यत् यथा श्रुतं जातु समेव
गरूं भवद्वाक्यार्थं नामिति १

आ० २५७

२५८

नरेवक्वचनेष्वापि तं युधिष्ठिरमभिमुखीकरोति यो जानातीति परस्य शत्रोः प्रज्ञां नीतिशास्त्रैकपदेन विश्वासमुत्पाद्यापि शत्रुर्हन्तव्य इति कणिकवचनरूपं तदनुसारिणीं यो जानाति स पुमान् विदुरस्य
या शत्रुकल्पितां आपदं निस्तरेत् तथाकुर्वीत अलमिति शेषः २१ तामेवापदमाह अलोहमित्यादिना शत्रुणा कृतं वारणावतस्थं शस्त्रं समस्ति शेनेत्याभिप्रेत्य तत्तुल्यतया प्रासादे यो
वेत्ति तं द्विषो न घ्नन्तीति संबंधः शस्त्रमिति दन्त्यसकारस्थाने तालव्यशकारः म्लेच्छभाषात्वात् हे त्वय इति वत्तव र्णविकारः शासम्बोपदं हारे स्वेन प्रत्ययान्तस्य रूपं तमेव विशिनष्टि अ
लोहमिति अलो अग्न लोग्निः आदि उपहीतिवद् ईलोपः तेन आग्नेयानि द्रव्याणि जतु शणसर्जरसादीनि लक्ष्यन्ते तेषां ऊहः समूहः [illegible]स्मिन् आग्नेये दीहकै द्व्येहपेतमित्यर्थः त
हिंसितानि स्तान्तु मशकानि वेत्यत आह शरीरपरिकर्तनमिति शरीरं स्वरूपं म्लेच्छभाषात्वाद्विभक्तिकमिदं पदं [illegible] परिलुप्य ओघ्राघवरीद्व पत्तोपः पार्श्विजे नाथवाकर्तनं हिं

यो जानाति परप्रज्ञां नीतिशास्त्रानुसारिणीं विज्ञापदं तथाकुर्वीतापदं मित्रस्य यथा २१ अलोहं निशितं शस्त्रं शरी
रपरिकर्तनं यो वेत्ति न तु तं घ्नन्ति प्रतिघातविदं द्विषः २२

सकं तस्मिन् दहेदं नहि हिंतान्यपवास्मे यानि द्रव्याणि मित्यादौ वर्जितेन स्वरूपेणाह इष्यते अतस्तं शरीरवर्तनं प्रासादं यस्त्याज्यं यो वेत्ति कर्त्तनमिति हिंसा धीस्य रूपाणि तेरूपं नच्छेदना
धीस्य हंतते रितिज्ञेयं कर्त्तनेन कालमाहनि शीतिश्चत्रानिजितं कर्त्तनमिति यत्र पव्यतिरेकेणा सर्वीई म्लेच्छभाषयैवोक्तं एवमग्रेपि श्लोके केनियपद ह्वान्येव म्लेच्छभाषा
भवति न सर्वः श्लोक इति ज्ञेयं यो वेत्ति तं प्रति घातविदं तस्य शस्त्रस्य प्रतीघातः प्रतीकारः तद्विदं द्विषः शत्रवो न घ्नन्ति हन्तुं न शक्नुवन्तीत्यर्थः २२ ॥ २२

आ॰
२६०

कस्तर्हि साहसी तस्मिन्नाहेव सतोऽस्मान् भस्मीकर्तुं यतिष्यतीत्यत आह कण्डूघ्न इति कण्डूः कुक्षिः पार्श्वे इति यावत् तत्र हन्ति गच्छतीति कण्डूघ्नः पार्श्वचरः पुरोवन एवं अत्र त्रसरेसेव प्र
यमेयदेव्यत्यपः हेतेर प्रसिद्धं गात्यर्थत्वं च मन्त्रे छभाषात्वात् कण्डूघ्न एव शिशिरघ्नः प्यणातिति हिनस्तीति शिशिरो ऽग्निः स्मर्द्धिसायामित्यस्य रूपं तेन हन्तीति शिशिरघ्नः गावा
गोरीति विरामाघि क्याशिकारः रूपं अपमेव पार्श्वचरैः पुष्मानग्निना हन्तुं आयातीत्यर्थः एवं तु र्थपमेव हेतव्यः इन्नवाररागावतमगात्वैव हास्तिनापुरं प्रत्ये वागतव्यमित्याशंक्याह
महा कण्डूघ्न इति महन्तिकं सुखं हिनस्तीति कण्डूघ्नः शत्रुवत्तीलोपेन कन्दे महतिशत्रौ सति एतत्र पंकर्तुमशक्यं ज्ञानकपठो हि वत्सवान् शत्रुः अत्यन्तमेव प्रहरेदिति भावः क
स्तर्हि त्राणोपाय इत्यत आह विलोकमस्विलान्तः प्रविष्टा यूयमस्य पुरो चनोऽन दहेत् तत्राह संभावना स्तितत्रा गृहान्त र्विलं कर्तव्यमित्यर्थः इत्यनेन प्रकारेणात्मानं यो

कण्डूघ्नः शिशिरघ्न महाकण्डे विलोक सः नरदहे दिति चात्मानं यो रक्षति स जीवति २३ माचक्षुर्वैतिर्यं प्या॰ नेनाचक्षुर्विंदते दिशः नाध्यति बुद्धिमान्
नि बुध्यस्वैवं प्रबोधितः २४ अनाप्तैर्दत्तमादत्ते नरः शास्त्रमलोहजं श्वाविच्छरणमासाद्य प्रमुच्येत हुताशनात् २५ ॥ ॥

रक्षति स जीवति तस्मात् त्वयाप्येवं ज्ञात्वा पापेनास्मासु रक्षणीयइत्यर्थः २३ ननु विलं प्रविष्टानामस्माकं विलमुखे प्रदीप्तेन वह्निना अन्तर्हूष्मणा नाशः कर्तव्य इत्याशंक्याविवे
कविनामार्गज्ञानं हि ज्ञानं च न भवति धैर्यविनाशे अश्वर्यं च न प्राप्यत इति विवेकं धैर्यं चाश्रयस्वेत्याह नाचक्षुरिति चक्षुः पश्यत्यनेनेति चक्षुः विवेकः संस्कृतए वायं श्लोको
नीतिप्रदर्शनार्थः २४ तत्र मार्गविवेकं तावदाह अनाप्तैरिति अनाप्तैः शत्रुभिर्दत्तं स्वीकारितं शस्त्रमाहं अलोहजं पूर्ववत् आग्नेयद्रव्यसमूहं जेता आदत्ते स्वीकरोति चे
त्तु नरः न हि श्वाविच्छल्लः तस्य शरीरांगं रक्षति हस्तस्पर्शाहिविनमुभयतो मुखं भवति तादृशं विलमासाद्य प्राप्य हुताशनात् प्रमुच्येत आत्मानं मोचयेत् तेन विल
प्रवेशेन मार्गजिज्ञासा एव विलाद्बहिर्निःसृतां युष्माकं नान्तरूष्मणा मरणं भविष्यतीत्युक्तं २५ ॥ ॥ ॥ ॥ ॥॥

विलानिः एतानामपिमार्गाज्ञानंकथंमवेदित्याशंक्याम्नायाव्याजेनसर्वेमार्गाज्ञातव्याइत्याशयेनाहचरन्मार्गान्विजानातीतिएवंज्ञातेपिमार्गेषुहस्तिनपुरंप्रतिनागंतव्यमित्या
शयेनाहनष्टैश्चविंदतेदिशइतिनानुकथमस्माभिर्लोकानामविदितेवित्तेकार्यपितुंशक्यंकथंवाविदिशांवंध्यश्वस्त्यक्ताव्यइत्यातव्यमित्याशंक्याहआत्मनेतिआत्मनःआ
त्मधर्मीयः त्वंचधर्मपुत्रः अतोहंतवआत्मातस्यममआत्मेवात्मासर्वाकार्यमस्यानियोक्तव्यःतेनमहायेनविलादिमपादयताहेतुनापंचेंद्रियाणिविदेशवासा

चरन्मार्गान्विजानातिनष्टैश्चविंदतेदिशः आत्मनाचात्मनःपंचपीडयन्नानुयोज्यते २६ एवमुक्तःप्रत्युवाचधर्मराजोयुधिष्ठिरः विदु
रंविदुषांश्रेष्ठंज्ञातमित्येवपांडवः २७ अनुशिक्ष्यानुगम्यैतान्कृत्वाचैवप्रदक्षिणं पांडवानभ्यनुज्ञायविदुरःप्रययौगृहान् २८
निवृत्तेविदुरेचापिभीष्मेपौरजनेतथा अजातशत्रुमासाद्यकुंतीवचनमब्रवीत् २९ क्षत्तायदब्रवीद्वाक्यंजनमध्येब्रुवन्निव
व त्वयाचस्तथेत्युक्तोजानीमोनचतद्वयं ३० यदीदंशक्यमस्माभिर्ज्ञातुंनचसदोषवत् श्रोतुमिच्छामितत्सर्वंसंवादंतव
तस्यच ३१ युधिष्ठिरउवाच गृहादग्निश्चबोद्धव्यइतिमांविदुरोब्रवीत् पंथाश्चवोनाविदितःकश्चित्स्यादितिधर्मधीः ३२ जि
तेंद्रियश्चवसुधांप्राप्स्यतीतिचमेब्रवीत् विज्ञातमितितत्सर्वंप्रत्युक्तोविदुरोमया ३३ वैशंपायनउवाच अष्टमेहनिरोहिण्यांप्र
याताःफाल्गुनस्यते वारणावतमासाद्यददृशुर्नागरंजनं ३४ इत्यादिपर्वणिजतुगृहे ॥ ॥

तर्हीष्टविषयासमर्पणेनपीडयन्नहंतोशाततप्रत्ययमत्राहितेनमत्सेनस्वधैर्यंरोधितिपाचतत्एताभ्यांद्वाभ्यामुपेतोनानुतप्यतेमयाकृत्संकेतंइतिपश्चांतायंनप्राप्नोतिमहीपश्चा
चःमुरांगंकृत्वाहास्यंतितेनमार्गोशादेशांतरेएव्यांतव्यंनतुहास्तिनपुरेप्रवेष्टव्यंनतुहास्तिनपुरेप्रवेष्टव्यंतातत्कपरेशाहिप्रवलःशत्रुःमत्परस्मेवप्रहरेदितिप्राणुत्तार
वाशयःधैर्यसतिपुनर्लक्ष्मीप्राप्तिर्भविष्यतीतिभावः २६ २९ अब्रुवन्निवव्यक्तांवाचमकुर्वन्निव ३० ३४ अध्यायः ॥ ७ ॥ ७

ततः १ आगतानिति छेदः २ १० शिवइत्याख्यामात्रं अर्थतस्त्वशिवं मरणार्थं कृतत्वात् ११ १४ मुंजः शरवल्कः १५ १६ ॥ ॥ ७२ ॥ ॥ ॥

वैश्यां ततः सर्वाः प्रकृतयो नगराद्वारणावतात् सर्वमंगलसंयुक्ता यथाशास्त्रमतंद्रिताः १ श्रुत्वागतान्पांडुपुत्रान्नानायानैः सहस्रशः अ-
भिजग्मुर्नरश्रेष्ठाञ्छ्रुत्वैव परया मुदा २ ते समासाद्य कौंतेयान्वारणावतका जनाः कृत्वा जयाशिषः सर्वे परिवार्योपतस्थिरे ३ तै
र्वृतः पुरुषव्याघ्रो धर्मराजो युधिष्ठिरः विबभौ देवसंकाशो वज्रपाणिरिवामरैः ४ सत्कृतास्ते तु पौरैश्च पौरान्सत्कृत्य पांडवाः अलंकृतं
जनाकीर्णं विविशुर्वारणावतं ५ ते प्रविश्य पुरं वीरास्तूर्णं जग्मुरथो गृहान् ब्राह्मणानां महीपाल रतानां स्वेषु कर्मसु नगराधिकृतानां
ते गृहाणि रथिनां तथा उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहाण्यपि ७ अर्चिताश्च नरैः पौरैः पांडवाः पुरुषर्षभ जग्मुरावसथं पश्चात्पु
रोचनपुरस्कृताः तेभ्यो भक्ष्यान्नपानानि शयनानि शुभानि च आसनानि च मुख्यानि प्रददौ स पुरोचनः ९ तत्र ते सत्कृतास्तेन सुमहार्ह
परिच्छदाः उपास्यमानाः पुरुषैरूषुः पुरनिवासिभिः १० दशरात्रोषितानां तु तत्र तेषां पुरोचनः निवेदयामास तदा शिवाख्यमशिवं गृहं
११ तत्र ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः पुरोचनस्य वचनात्कैलासमिव गुह्यकाः १२ तच्चागारमभिप्रेक्ष्य सर्वधर्मविशारदः उवा
चाग्नेयमित्येव भीमसेनं युधिष्ठिरः १३ जिघ्रन्सौम्य वसागंधं सर्पिर्जतुविमिश्रितं कृतं हि व्यक्तमाग्नेयमिदं वेश्म परंतप १४ शा
णसर्जरसं व्यक्तमानीतं गृहकर्मणि मुंजबल्वजवंशादि द्रव्यं सर्वं घृतोक्षितं १५ शिल्पिभिः सुकृतं ह्याप्तैर्विनीतैर्वेश्मकर्मणि अ
स्मिन्विश्रब्धास्मनो वह्निं दातुकामः पुरोचनः १६ तथा हि वर्तते मंदः सुयोधनमते स्थितः १७ ॥ ७२ ॥ ॥ ॥

इमामापदंभाविनीं दृष्ट्वान्तर्कितःतेनहेतुना अशिवंगृहमित्यस्मान्बोधितवानइतिसंबंधः १७ १९ योगरूपकेणागृहवासकर्त्तव्यतामाह इहेतिनिराकारैः अनाविष्कृतवासचेष्टैः
इष्ट्यागतिनिरूपदृश्चंमार्गपदेइइह देहेनिराकारै [illegible] मनालक्ष्यद्धि पंपनैःशमादिपरैः अमत्तैःसूतिमद्भिः कृवांगतिमोहं २० २१ उपक्रोशात्नगर्हितः २२ अयंभीष्मइतिसं

इमांतुतांमहाबुद्धिर्विदुरोदृष्ट्वांसदा आपदंयेनवासार्थंकुरुतेनिस्तरेयथा १७ नेवयंवोधितास्तेनबुद्धिमंत्तोशिवंगृहं आचार्यैर्सुकृतं
प्राप्तादुर्योधनवशानुगैः १८ भीमसेनउ च परीरगृहमाग्नेयंभवान्वदतिनिश्चितं तत्रैववासगाध्यामोपत्रपूर्वोषितावयं १९
युधिष्ठिरउ च इह्यनैर्निराकारैर्वस्तव्यममभिरोचये २० अप्रमत्तैर्विचिन्वद्भिर्गतिमिष्टांकृवामितः यदिविंदेतचाकारमस्मा
कंस्यपुरोचनः क्षिप्रकारीततोभूत्वाप्रसह्यापिदहेतनः २१ नायंविभेत्युपक्रोशादधर्माद्वापुरोचनः तथाहिवर्त्ततेमंदःसुयोधन
वशेस्थितः २२ अपिचापीहदग्धेषुभीष्मोस्मासुपितामहः कोपंकुर्यात्किमर्थंवाकौरवान्कोपयेतसः २४ अपूचापीह
दग्धेषुभीष्मोऽस्माकंपितामहः धर्मइत्येवकुप्येरन्नथान्येकुरुपुंगवाः वयंतुपरिदाहस्यबिभ्यतःप्रद्रवेमहि २५ समैन्योघातं
येद्राज्ञाराज्यलुब्धःसुयोधनः आपदस्थानपदेतिष्ठन्नपदस्थानपदसंस्थितः हीनकोशान्महाकोशःससैन्योघातयेद्ध्रुवं २६
तदस्माभिरूपायेयंतंचपापंसुयोधनं वंचयद्भिर्विवस्तव्यं छन्नवासंक्वचित्क्वचित् [illegible] तेवयंमृगाशीलाघ्र
रामोवसुधामिमां तथानोविदितामार्गाभविष्यंतिपलायतां २८ ॥ ॥

बंधः २३ दग्धेषुअस्मासुअग्निदग्धेषुकोपोधर्मइत्येवकारणंकृत्वाभीष्मोऽन्येचकुप्येरन् २४ दाहस्यदाहात्तस्यशेष्मावैः २५ पदंदेशकोशा [illegible] स्तत्रस्थितान् अत्र
पदस्थान् असहायान् अयोगिन्यायैः २६ छन्नावासगृहस्थानेवसतम् अधिष्ठातव्यं २८ ॥ ॥ ॥

कचित्काले छन्नावासमेवाहमौम मितिगूढः श्वासोपियेषां तान्रंध्रैर्विहितकर्णव्यानित्यर्थः २९ अत्रावित्ते ३० अध्यायः विदुरस्य १ प्रच्छन्नं यथास्यात्तथा पांडवान्श्रे

मौमं च विलमं चैव कारयामास सत्वरं गत्वोच्छ्वासान्वनस्तत्र हुताशात्संप्रधक्ष्यति २९ वसतो घव यथावास्मान्नबुध्येत पुरोचनः पौरो वापि जनः क
श्चित्तथा कार्यं मतं हि ते ३० इत्यादिपर्वणि जतुगृहदाहे चैत्रं विदुरस्य सुहृत्कश्चित्खनकः कुशलः शुचिः विविक्ते पांडवान्राजन्नि
दं वचनमब्रवीत् १ प्रहितो विदुरेणास्मि खनकः कुशलो भृशं पांडवानां प्रियं कार्यमिति किं करवाणि वः २ प्रच्छन्नं विदुरेणोक्तः श्रेय
स्त्वमिह पांडवान् प्रतिपादय विश्वासादिति किं करवाणि वः ३ कृष्णपक्षे चतुर्दश्यां रात्रावस्य पुरोचनः भवनस्य तव द्वारि प्रदास्यति हु
ताशनं ४ मात्रा सह प्रदग्धव्याः पांडवाः पुरुषर्षभ इति व्यवसितं पार्थ धार्त्तराष्ट्रस्य मे श्रुतं ५ किंचिच्च विदुरेणोक्तो म्लेच्छवाचासि पांडव
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणात् ६ उवाच तं सत्यधृतिः कुंतीपुत्रो युधिष्ठिरः अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ७ शु
चिमाप्तं प्रियं चैव सदा च दृढभक्तिकं न विद्यते कवेः किंचिदभिज्ञानप्रयोजनं ८ यथा नः स तथा नस्त्वं निर्विशेषा वयं त्वयि भवतः स्म
यथा तस्य पालयास्मान्यथा कविः ९ इदं शरणमाग्नेयं मदर्थमिति मे मतिः पुरोचनेन विहितं धार्त्तराष्ट्रस्य शासनात् १० स पापः कोशवा
न्श्चैव ससहायश्च दुर्मतिः अस्मान्पहिदुष्टात्मा नित्यकालं प्रवाधते ११ स भवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात् अस्मास्विह
विदग्धेषु सकामः स्यात्सुयोधनः १२ ॥ १२ ॥ रू४

यः प्रतिपादयेत्युक्तोहं वः किं करवाणि ३ ४ ५ म्लेच्छवाचा म्लेच्छभाषया ६ ७ कवेः सर्वज्ञस्य क्रांतदर्शिनो वा ८ यथा वयं तस्य न तथा भवतस्त्वपालनीयाः अतोस्मान्यथा कविः पा
लयति तथा त्वमपि पालयेत्यर्थः ९ शरणं गृहं १० ११

प्रांतेष्वाकारमूलं निःप्रतीकारं वह्निनिर्वापणप्रकारशून्यं १३ १५ परिखाप्राकारपरिधिमध्ये तोगर्भः तां नाम प्रसिद्धं उत्किरन् परिखापरिष्कारव्याजेन विलात् मृदमुत्किरन् बहिः क्षिपन्
महाविलं सुरंगाख्यं चकार १६ मध्ये मध्यतः १७ व्यदधात् पिहितवान् १८ स पुरोचनस्तेषां पंचगृहद्वारि क्षपां वसंति स्म दिवा च मृगयां चरंति अतो न चारः श्वभ्रं पुरो

समृद्धमायुधागारमिदं तस्य दुरात्मनः वर्णितेभिः प्रतीकारमालिप्येदं कृतं महत् १३ इदं तच्छुभं नूनं तस्य कर्म चिकीर्षितं प्रागेव विदुरो वेदये
नास्मानन्वबोधयत् १४ सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान् पुरा पुरोचनस्याविदितानस्मांस्त्वं परिमोचय १५ स तथेति प्रतिश्रुत्य खन
कोपत्नमास्थितः परिखामुत्किरन्नाम चकार सुमहद्बिलं १६ चक्रे च वेश्मनस्तस्य मध्ये तत्र महद्बिलं कश्चिद्यथा न जानाति समं भूम्यास्य भारत
१७ पुरोचनभयाच्चैव व्यदधात्संवृतं मुखं १८ स तस्य तु गृहद्वारि वसत्यशुचिधीः सदा तत्रैते सायुधाः सर्वे वसंति स्म क्षपां नृप १९ दिवा
चरंति मृगयां पांडवेया वनाद्वनं विश्वस्तवदविश्वस्ता वंचयंतः पुरोचनं २० अतुष्टास्तुष्टवद्राजन्नूषुः परमदुःखिताः २१ न चैनानन्वबुध्यंत
नरा नगरवासिनः अन्यत्र विदुरामात्यात्तस्मात्खनकसत्तमात् २२ इत्यादिपर्वणि जतुगृहदाहे वैशंपायनउ च तांस्तु दृष्ट्वा सुमनसः परिसंव
त्सरोषितान् विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः वंचितोयं नृशंसात्मा कालमन्यपलायने ३ आयुधागारमादीप्य दग्ध्वा चैव पुरोचनं प्रा
णिनः प्रणिधायेह द्रवामो विवराश्रिताः ४ धर्मराजनिदेशेन कुंती ब्राह्मणभोजने चक्रे निशि महद्राजन्नाजग्मुस्तत्र योषितः ॥ ॥

चनान्वेष्टुं शक्यतेति भावः १९ २२ अध्यायः तांस्तु ३ षट्प्राणिन इति अन्यथा पलायनशंकया पुनरस्मदन्वेषणो मतिः स्यात् सा मा भूदिति भावः ४ ५ ॥ ॥

२२ अध्यायः एतस्मिन्पर्व्वणि संग्रसंपंपयांसंकेतंश्रुचिंनाविकं १ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥

दाहितं ६ तत्कं ४

ताविहृत्य यथाकामं भुक्त्वा पीत्वा च भारत जग्मुर्निशि गङ्गायां नैव समस्तास्तत्र पोषिताः ६ निवासे पञ्चपुत्रास्तु तस्मिन्भोज्ये परं छया अनार्यि
नीमसम्प्याताः सपुत्राः कालनोदिता ७ साभुक्त्वा विविधं भोज्यं सह पुत्रैः समन्विता व क्वाशित्वा हि कलांगोरम्येतस्मिन्नुरदेहतरा ८ सुखापवि
गतज्ञानामत्तकल्यान राधिप अथप्रवातेतु मुलेनि निशि सुप्तजने प्रभो ९ तद्गृहादीपयं ह्रीमः शेतेपत्रपुरोचनः ततो जतुगृहं द्वारं दीपया
मास पाण्डवः १० समन्ततोददुः पश्चाद्गृहंतं जतुवेश्मनि ज्ञात्वा च तद्गृहं दीप्तं सर्वतः पाण्डुनंदनाः ११ सुं[illegible] विविशुः सर्वे मात्रा सह परंतपाः ता
तः प्रवाते सुमहान्शब्दश्चैव विभावसोः प्रादुरासीत्तत स्तेन तद्बुबुधे स जनव्रजः तदवेक्ष्य गृहं दीप्तमाहुः पौराः कृशाननाः ॥ १२ यो
गात्कृतः दुर्योधनप्रयुक्तेन पापेनाकृतबुद्धिना १३ गृहमात्मविनाशाय कारितं च पतत् अहो धिक्धृतराष्ट्रस्य बुद्धिर्नातिसमंज
सी योसुधान्पाण्डवान्बालान्दाहयामास मन्त्रिणा १४ दिष्ट्या त्विदानीं पापात्मा दग्धोयमतिदुर्मतिः अनागसः सुविश्वस्तान्यो
ददाहनरोत्तमान् १५ वैशंपायनउवाच एवं ते विलपन्ति स्म वारणावतका जनाः परिवार्य गृहं तत्र तस्थुस्तां रात्रिं समन्ततः १६ पाण्ड
वाश्चापि ते राजन्मात्रा सह सुदुःखिताः बिलेन तेन निर्गम्य जग्मुर्गूढमलक्षिताः १७ तेन निद्रोपरोधेन साध्वसेन च पाण्डवाः न शेकुः
सहसा गन्तुं सह मात्रा परंतपाः भीमसेनस्तु राजेन्द्र भीमवेगपराक्रमः जगाम भ्रातॄनादाय सर्वान्मातरमेव च १९ स्कन्धमारोप्य जनन
नीं यमावंकेन वीर्यवान् पार्थौ गृहीत्वा पाणिभ्यां भ्रातरौ सुमहाबलः २१ तरसा पादपान्भंजन्महीं पद्भ्यां विदारयन् स जगामाशु
तेजस्वी वातरंहा वृकोदरः २२ इत्यादिपर्वणि जतुगृहे वैशंपायनउवाच एतस्मिन्नेव काले तु यथा संप्रत्ययं कवि: विदुरः प्रेषयामास तत्त
द्वनेपुरुषं शुचिं १ ॥ ॥ ॥

राम०
२६३

मायया नानाज्जलयरिमाणां परीक्ष्य मार्गान् २ तस्य चेष्टितं चारेण विदुरस्य विदितं पतस्ततोः विदुरेण ततः स्वच्छानात्स्वरः प्रवासितः प्रेषितः इति सार्धश्लोको वाक्यं ३

सात्वानुपयोर्देशं पांडवा[illegible]न्दृष्ट शिवेवने ततन्यासह कौरव्य मायया नानारी जलं २ विदितं तन्महाबुद्धेर्विदुरस्य महा
त्मनः ततस्तस्यापि चारेण चेष्टितं पापचेतसः ततः संप्रेषितो विद्वान् विदुरेण नरस्तदा ३ पार्थानार्दशयामास मनोमारुत
गामिनी सर्ववातसहां नावं यंत्रयुक्तां पताकिनी ॥ शिवे भागीरथी तीरे नरैर्विस्रंभिभिः कृतां ४ ततः पुनरथोवाच ज्ञापकं पूर्व
चोदितं युधिष्ठिर निबोधेदं संज्ञार्थं वचनं कवेः ५ कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः न हंतीत्येवमात्मानं यो रक्षति
स जीवति ६ तेन मां प्रेषितं विद्धि विश्वस्तं संज्ञयानया भूयश्चैवाह मां क्षत्ता विदुरः सर्वतोर्थवित् ७ कर्णं दुर्योधनं चैव भ्रातृभि
सहितं रणे शकुनिं चैव कौंतेय विजेतासि न संशयः ८ इयं वारि पथे युक्ता नौरप्सु सुखगामिनी मोचयिष्यति वः सर्वानस्माद्देशा
न्न संशयः ९ अथ तान्व्यथितान्दृष्ट्वा सह मात्रा नरोत्तमान् नावमारोप्य गंगायां प्रस्थितानब्रवीत्पुनः १० विदुरो मूर्ध्न्युपा
घ्राय परिष्वज्य वचो मुहुः अरिष्टं गच्छताव्यग्राः पंथानमिति चाब्रवीत् ११ इत्युक्त्वा स तु तान्वीरान्पुमान्विदुरचोदितः तारया
मास राजेंद्र गंगां नावा नरर्षभान् १२ तारयित्वा ततो गंगां पारं प्राप्तांश्च सर्वशः जयाशिषः प्रयुज्याथ यथागतमगाद्धि सः १३
पांडवाश्च महात्मानः प्रतिसंदिश्य वै कवेः गंगामुत्तीर्य वेगेन जग्मुर्गूढमलक्षिताः १४ इत्यादि पर्वणि जतुगृहे वैशंपायन उवाच
अपराः श्रावयंतीनां पामशेषेण नागरो जनः तत्राजगाम त्वरितो दिदृक्षुः पांडुनंदनान् १

सनरदृश्यामास ४ ५ ६ ७ ८ ९ १० ११ १२ अध्यायः अप ३ ३ ३ ॥ ॥ ॥ ॥ ॥

म २

६ व्यापोह्यमानाः निर्वापयन्तः ७ ११ कु॰ल्यानि कृच्छ्राणि कार्यं तु संस्कारं तु कुलं जलप्रदे गोत्रसजातीयगणोपि चाभवनेचततनौ त्कीवं कंरकार्यौ मृधौ कुलीतिमेदिनीकुलं

निर्वापयन्तो ज्वलनं ते जना ददृशुस्ततः । जातुषं तद्गृहं दग्धममात्यं च पुरोचनं २ नूनं दुर्योधनेनेदं विहितं पापकर्मणा । पाण्डवा-
नां विनाशायेत्येवं ते चुक्रुशुर्जनाः ३ विदिते धृतराष्ट्रस्य धार्तराष्ट्रो न संशयः । दग्धवान्पाण्डुदायादान्न ह्येनं प्रतिषिद्धवान् ४ नूनं
शान्तनवो पीह न धर्ममनुवर्तते । द्रोणश्च विदुरश्चैव कृपश्चान्ये च कौरवाः ५ ते वयं धृतराष्ट्रस्य प्रेषयामो दुरात्मनः । संवृत्तस्ते परः
कामः पाण्डवान्दग्धवानसि ६ ततो व्यपोह्यमानास्ते पाण्डवार्थे हुताशनं । निषादीं ददृशुर्दग्धां पंचपुत्रामनागसं ७ खनकेन
तु तेनैव वेश्म शोधयता बिलं । पांसुभिः पिहितं तत्र पुरुषैस्तैर्न लक्षितं ८ ततस्ते ज्ञापयामासुर्धृतराष्ट्रस्य नागराः । पाण्डवानग्नि-
ना दग्धानमात्यं च पुरोचनं ९ श्रुत्वा तु धृतराष्ट्रस्तद्राजा सुमहदप्रियं । विनाशं पाण्डुपुत्राणां विललाप सुदुःखितः १० अद्य
पाण्डुर्मृतो राजा मम भ्राता महायशाः । तेषु वीरेषु दग्धेषु मात्रा सह विशेषतः ११ गच्छन्तु पुरुषाः शीघ्रं नगरं वारणावतं । सत्कारयं-
तु तान्वीरान्कुन्तिराजसुतां च तां १२ कारयन्तु च कुल्यानि शुभानि च बृहन्ति च । ये च तत्र मृतास्तेषां सुहृदो यान्तु तानपि १३ एवंग-
ते मया शक्यं यत्कारयितुं हितं । पाण्डवानां च कुन्त्याश्च तत्सर्वं क्रियतां धनैः १४ एवमुक्त्वा ततश्चक्रे ज्ञातिभिः परिवारितः । उद-
कं पाण्डुपुत्राणां धृतराष्ट्रोम्बिकासुतः १५ रुरुदुः सहिताः सर्वे भृशं शोकपरायणाः । हा युधिष्ठिर कौरव्य हा भीम इति चापरे १६
हा फाल्गुनेति चाप्यन्ये हा यमाविति चापरे । कुन्तीमार्त्ताश्च शोचन्तः उदकं चक्रिरे जनाः १७ अन्ये पौरजनाश्चैवमन्वशोचन्त पा-
ण्डवान् । विदुरस्त्वल्पशश्चक्रे शोकं वेद परं हि सः १८ ॥

स्यात्कीकसे पीति च कुल्यानि चैत्यानीयन्मे महाव है गायामहाप्रासादेनवाः स्वकितानि चलगणीत्यर्थः १३ २० ॥ ॥ ॥ ॥ ॥ ॥

२६ अध्यायः तेन शुक्राणामेत्येषायां योऽसमये त्वावर्जिताः समीकृताः वाताः वृक्षा यस्मिन् १ अवरुद्धभंग्या २ रोषितः रोषं प्रापितः त्रिगुणं दुःकाणि स्तुल्यस्वदेशेषु प्रस्रुतो

घाः १

पांडवास्त्वपि निर्गत्य नगराद्वारणावतात् नदीं गंगामनुप्राप्ता मातृषष्ठा महाबलाः १९ दाशानां भुजवेगेन स्रोतोवेगेन च वायुना
वातानुकूलेन नरा शीघ्रं पारमवाप्नुवन् २० ततो नावं परित्यज्य प्रययुर्दक्षिणां दिशं विज्ञाय निशि पंथानं नक्षत्रगणसूचितं २१ यतमाना वने
राजन्गहनं प्रतिपेदिरे ततः श्रांताः पिपासार्ता निद्रांधाः पांडुनंदनाः पुनरूचुर्महावीर्यं भीमसेनमिदं वचः २२ इतः कष्टतरं किं नु यद्वयं गहने
वने दिशश्च न विजानीमो गंतुं चैव न शक्नुमः २३ तं च पापं न जानीमो यदि दग्धः पुरोचनः कथं नु विप्रमुच्येम भयादस्मादलक्षिताः २४
पुनरस्मानुपादाय तथैव व्रज भारत त्वं हि नो बलवानेकः यथा सततगस्तथा इत्युक्तो धर्मराजेन भीमसेनो महाबलः आदाय कुंतीं भ्रातॄंश्च
जगामाशु महाबलः २५ इत्यादिपर्वणि जतुगृहे वैशंपायनउ च तेन विक्रममाणेन ऊरुवेगसमीरितं वनं सवृक्षविटपं व्याघूर्णितमिवा
भवत् १ जंघावातो ववौ चास्य शुचिशुक्रागमे यथा आवर्जितलतावृक्षं मार्गं चक्रे महाबलः २ मृद्नन्पुष्पितांश्चैव फलितांश्च वनस्पती
न् अवरुज्य ययौ गुल्मान्पथस्तस्य समीपजान् ३ रोषितो रुक्ष्णो वने भंजन्महाद्रुमान् त्रिप्रस्रुतमदः शुष्मी षष्टिवर्षो मतंगरा
ट् ४ गच्छतस्तस्य वेगेन तार्क्ष्यमारुतरंहसः भीमस्य पांडुपुत्राणां मूर्छेव समजायत ५ असकृच्चापि संतीर्य दूरपारं भुजप्लवैः प
थि प्रच्छन्नमासेदुर्धार्तराष्ट्रभयात्तदा ६ कृच्छ्रेण मातरं चैव सुकुमारीं यशस्विनीं अवहत्स तु पृष्ठेन रोधस्सु विषमेषु च ७ ॥ ॥

महोयस्यासः शुष्मी तेजस्वी शुष्मं तेजः तेजसा सिद्धर्षेनाः इति मोदिनी षष्टिवर्षो षष्टिवर्षीयौवनः ४ ५ दूरं पारं गंगाप्रवाहं वने पितस्मात् दूरपारं नीतिमाकः भुजप्लवैः भुजाभ्यां प्लवनैः बहुत्वे व्याप
रमेदा ६ रोधः सु उच्चभागेषु ७ ॥ ॥

अनार्तवैः अनृतुभवैः उत्पातरूपैरित्यर्थः ९ गुल्माः स्तंबाः क्षुपो ह्रस्वशाखो वृक्षः अवभुग्नः नामितः १० तृष्णया तृषा ११ १९ गव्यूतिमात्रात् क्रोशद्वयात् २० २१

आगमच्च वनोद्देशमल्पमूलफलोदकं क्रूरपक्षिमृगं घोरं सायाह्ने भरतर्षभ ८ घोरा समभवत्संध्या दारुणा मृगपक्षिणः अप्रका
शा दिशः सर्वा वातैरासन्ननार्तवैः ९ शीर्णपर्णफलै राजन्बहुगुल्मक्षुपैर्द्रुमैः भग्नावभुग्नभूयिष्ठैर्नानाद्रुमसमाकुलैः १० ते श्रमेण च कौर
व्यास्तृष्णया च प्रपीडिताः नाशक्नुवंस्तदा गंतुं निद्रया च प्रवृद्धया ११ न्यविशंत हि ते सर्वे निरास्वादे महावने ततस्तृषापरिक्रांता कुंती पुत्रान
थाब्रवीत् १२ माता सती पांडवानां पंचानां मध्यतः स्थिता तृष्णया हि परीतास्मि पुत्रान्भृशमथाब्रवीत् १३ तच्छ्रुत्वा भीमसेनस्य मातृस्ने
हात्प्रजल्पितं कारुण्येन मनस्तप्तं गमनायोपचक्रमे १४ ततो भीमो वनं घोरं प्रविश्य विजनं महत् न्यग्रोधं विपुलच्छायं रमणीयं ददर्श ह १५
तत्र निक्षिप्य तान्सर्वानुवाच भरतर्षभः पानीयं मृगयामीह विश्रमध्वमिति प्रभो १६ एते रुवंति मधुरं सारसा जलचारिणः ध्रुवमत्र जलस्था
नं महच्चेति मतिर्मम १७ अनुज्ञातः स गच्छेति भ्रात्रा ज्येष्ठेन भारत जगाम तत्र यत्र स्म सारसा जलचारिणः १८ स तत्र पीत्वा पानीयं स्नात्वा च भर
तर्षभः उत्तरीयेण पानीयमानयामास भारत १९ गव्यूतिमात्रादागत्य त्वरितो मातरं प्रति शोकदुःखपरीतात्मा निशश्वासोरगो यथा २०
स सुप्तां मातरं दृष्ट्वा भ्रातॄंश्च वसुधातले भृशं शोकपरीतात्मा विललाप वृकोदरः २१ अतः कष्टतरं किंनु द्रष्टव्यं हि भविष्यति यत्प
श्यामि महीसुप्तान्भ्रातॄनद्य सुमंदभाक् २२ शयनेषु परार्ध्येषु ये पुरा वारणावते नाधिजग्मुस्तदा निद्रां ते प्रसुप्ता महीतले २३ स्वसा
रं वसुदेवस्य शत्रुसंघावमर्दिनः कुंतिराजसुतां कुंतीं सर्वलक्षणपूजितां २४ स्नुषां विचित्रवीर्यस्य भार्यां पांडोर्महात्मनः तथैव चा
स्मज्जननीं पुंडरीकोदरप्रभां २५ ॥

सुमंदभाक् अतिमंदभाग्यः २२ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

३१ एकजः एक एव जातः अमहार्हः १ पः ३२ ३४ बांधवानां नंदनात्सुखदाः ३५ ३७ तुभ्यं तव ३८ ३९ ४२ ॥ ॥ ॥ ॥

सुकुमारतरोमेनंमहार्हशयनोचितो शयानोयश्यतापृष्ठेपृथिव्यामतयोचितो २६ धर्मादिंद्राच्चवायोश्चसुतस्तेयासुतानिमान्
सेयंभूमौपरिश्रांताशेतेप्रासादशायिनी २७ किंनुदुःखतरंशक्यंमयाद्रष्टुमतःपरं योहमद्यनरव्याघ्रान्सुप्तान्पश्यामिभूतले २८
त्रिषुलोकेषुयोराज्यंधर्मनित्योहितेनृपः सोयंभूमौपरिश्रांतःशेतेप्राकृतवत्कथं २९ अयंनीलांबुदश्यामोनरेष्वप्रतिमोर्जुनः
शेतेप्राकृतवत्सुविषमाकुलपंनगः भूमौ तत्तोदुःखतरंनुकिं ३० अश्विनाविवदेवानांयाविमौरूपसंपदा तौप्राकृतवद्द्येमौ
प्रसुप्तौधरणीतले ३१ ज्ञातयोयस्यनैवस्युर्विषमाःकुलपांसनाः सजीवतिसुखंलोके ग्रामद्रुमइवैकजः ३२ एकोवृक्षोहियोग्रामेभवेत्प
र्णफलान्वितः चैत्योभवतिनिर्ज्ञातिरर्चनीयःसुपूजितः ३३ येषांचबहवःशूराज्ञातयोधर्मसंश्रिताः तेजीवंतिसुखंलोकेभवंतिचनि
रामयाः ३४ बलवंतःसमृद्धार्थामित्रबांधवनंदनाः जीवंत्यन्योन्यमाश्रित्यद्रुमाःकाननजाइव ३५ वयंतुधृतराष्ट्रेणसपुत्रेणदुरात्मना
विवासितानदग्धाश्चकथंचिद्दैवसंश्रयात् ३६ तस्मान्मुक्तावयंदाहादिमंवृक्षमुपाश्रिताःकांदिशंप्रतिपत्स्यामप्राप्ताःक्लेशमनुत्तमं ३७
सकामोभवदुर्बुद्धेधार्तराष्ट्राल्पदर्शन नूनंदेवाःप्रसन्नास्तेनानुज्ञांमेयुधिष्ठिरः ३८ प्रयच्छतिवधेतुभ्यंतेनजीवसिदुर्मते ३८ नन्व
द्यसुतामात्यसहकर्णानुजसौबलं गत्वाक्रोधसमाविष्टःप्रेषयिष्येयमक्षयं ३९ किंनुशक्यंमयाकर्तुंयत्तेनक्रुध्यतेनृपः धर्मात्मा
पांडवश्रेष्ठःपापोचापिसुयोधनः ४० एवमुक्त्वामहाबाहुःक्रोधसंदीप्तमानसः करंकरेणनिष्पिष्यनिःश्वसन्दीनमानसः ४१

४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ४२ ॥ ॥